GOVERNMENT OF TAMILNADU

# संस्कृतरञ्जनी

# SANSKRIT READER
## X STD

" सह नाववतु सह नौ भुनक्तु
सह वीर्यं करवावहै "

Department of School Education

**Untouchability is Inhuman and a Crime**

**Government of Tamil Nadu**

First Edition - 2019

Reprint - 2020, 2021, 2022, 2023, 2024

Published under New Syllabus



**Content Creation**

State Council of Educational Research and Training



© SCERT 2019



**Printing & Publishing**

Tamil Nadu Textbook and Educational Services Corporation

www.textbooksonline.tn.nic.in




Introduction Pages.indd 2 22-03-2019 15:36:32

# आमुखम् - Preface

“विद्याधनं सर्वधनप्रधानम्” इत्युक्तिः। अत एव मनुष्याः तद्धनमार्जयितुं यतन्ते। तत्रापि बालकाः विद्यालयेषु छात्रान् भूत्वा तदार्जयन्ति। यतो हि, विद्यया विना कस्यापि गौरवं न आगच्छति। विद्या गुरूणां गुरुः भवति।

अद्यत्वे केवलं पुस्तकस्था विद्या छात्राणां सुखकरी न भवति। सैव विद्या भवति या भविष्यत्काले स्वस्वप्नं वास्तविकं कर्तुम् उपयुक्ता भवेत्। अतः अद्यत्वे पुस्तकीयज्ञानेन सह प्रायोगिकज्ञानसंपादनाय अवसरः प्रकल्पितः विद्यते।

परं भारतीयाः महर्षयः शिष्येभ्यः तादृशीमेव ज्ञानकरीं विद्याम् अबोधयन् इत्ययं विषयः संस्कृतग्रन्थैः ज्ञायते। अतः छात्राणां कृते संस्कृताध्ययनं महदुपकारं कल्पयति। तत्र विद्यामानाः वेदस्मृत्यादयः ग्रन्थाः छात्राणां कृते भारतीयसंस्कृतिं संबोध्य, सन्मार्गप्रवर्तने धर्मेण वर्तितुं च उत्साहं जनयति।

प्रस्तुतं दशमकक्ष्यायाः कृते निर्मितमिदं संस्कृतपाठ्यपुस्तकं तावत् अस्माकं संस्कृतिं, देशस्य औन्नत्यं, सनातनधर्मस्य च महत्वं कथयति। इदं यथा छात्राणां श्रवण-भाषण-पठन-लेखनमिति चत्वारि कौशलानि विकसितानि भवेयुः, छात्राः अत्रोक्तैः नीतिविषयैः अस्माकं संस्कृतिं ज्ञात्वा, पूर्वजानां आचारमवगत्य च सदा सन्मार्गप्रवर्तने यतेयुः, मिथ्याज्ञानमपाकृत्य वास्तविकं ज्ञानं प्राप्नुयुः, केवलं मौखिकपठनम् अपाकृत्य सचिन्तनं व्यवहर्तुं प्रयत्नं कुर्युः, एवं च पारम्परिकभाषात्वेन विद्यमानया तमिल्भाषया सह तुलनां कृत्वा उभयोः तमिल्संस्कृतयोः महत्वं जानीयुः, तथा निर्मितं पाठ्यपुस्तकं छात्राणां सर्वाङ्गीनविकासाय स्वलक्ष्यप्राप्तये च शिक्षकसमित्या परिकल्पितं विद्यते।

अस्मिन् पाठ्यपुस्तके प्रधानतया गद्यं, पद्यं, व्याकरणमिति भागत्रयं वर्तते। एकैकस्मिन् विभागे शब्दकोशः, अर्थकोशः, अर्थज्ञानकौशलाभ्यासाः, भाषाज्ञानकौशलाभ्यासाः, कौशलवर्धनावृत्यभ्यासाः इति लक्ष्येषु विषयाः संकलिताः सन्ति।

अर्थज्ञानकौशलाभ्यासे प्रश्नाः पृष्टाः सन्ति। एते प्रश्नाः पाठविषयमभिप्रेत्य पृष्टाः। ततः परं भाषाज्ञानकौशलवर्धकाः प्रश्नाः सन्ति।

गद्यभागे स्थितानां पाठानां पदशब्दप्रयोगमधिकृत्य विषयाः स्थापिताः सन्ति । व्याकरणं च पाठाननुसृत्य अध्यापनीयमिति मत्वा तथा व्याकरणविषयाः निबद्धाः सन्ति यथा छात्राः सुलभेन पाठान् अवगच्छेयुः । तदतिरिच्य छात्रावगमनशक्तिं वर्धयितुम् अनुच्छेदलेखनम्, अनुवादः इति भागद्वयं परिकल्पितं विद्यते।



Introduction Pages.indd 3 22-03-2019 15:36:32

## देशीयगीतम्

जन गण मन अधिनायक जय हे
भारत भाग्य विधाता
पञ्जाब सिन्धु गुजरात मराठा
द्राविड उत्कल बङ्गा
विन्ध्य हिमाचल यमुना गङ्गा
उच्छल जलधि तरङ्गा
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय गाथा
जन गण मङ्गल दायक जय हे
भारत भाग्य विधाता
जय हे जय हे जय हे
जय जय जय जय हे !

महाकवि रवीन्द्रनाथ ठाकुरः

अस्पृश्यत्वम् अपचारः
अस्पृश्यत्वम् अपराधः
अस्पृश्यत्वम् अमानवधर्मः

## राष्ट्रिय प्रतिज्ञा

सर्वे वयं भारतदेशबालाः
स्वातन्त्र्यपीयूषसरोमरालाः ।
नीचोच्चजात्यादिविभेदशून्याः
सर्वे समानाश्च सहोदराश्च ।। ।।1।।

एको भावः सर्वसंक्षेपरूपः
एका भाषा भूतकारुण्यरूपा ।
एकं लक्ष्यं सामरस्यं समेषां
एकं तत्वं चित्तमानन्दपूर्णम् ।। ।।2।।



Introduction Pages.indd 4 22-03-2019 15:36:32

# SANSKRIT AND CULTURE GO TOGETHER

- Swami Vivekananda

## OBJECTIVES:-

- To create interest in Sanskrit learning.
- To make the school going children to understand the precepts and practice of Indian culture and to inherit the leadership qualities.
- To enjoy the ancient classic with aesthetic experience.
- To prepare the students to speak, quote and compare Sanskrit with other languages.
- To morally and ethically enrich the attitude of students in order to make them as noble citizens of India.

Tamil and Sanskrit are friendly Classical languages of our motherland for so many centuries.

Both the languages have mutual affinity to each other. Hence the learning of Sanskrit language in Tamil Nadu would help the comparative studies in future.

Of course, Sanskrit learning along with Tamil (उभयप्रधान) mutually giving importance to each other was in vogue for many decades.

However, an attempt through this preparation of Textbooks has been made to enthuse the students not only to read Sanskrit in its original tongue but also to understand the merits of both the classical languages.

The listening and understanding the meaning of the word and sentences deeply reflecting the values and contents would be highly useful for the students of today.

The present preparation of the Sanskrit Textbooks for the Class 10 adopt the modern methodology by way of framing typical questions that would enhance the memory as well as the language speaking skills of the students.

Meticulous care has been taken to select portions suitable to the respective standards after comparing the contents of Sanskrit books prescribed in various standards in various states.

Apart from the course book and the workbook, study materials are given for additional reading to enrich the knowledge of the students.

The assessment and the examination pattern are in par with other languages taught in unified syllabus of Tamil Nadu.

**-Text Book Committee**



Introduction Pages.indd 5 22-03-2019 15:36:32

# विषयसूची – (INDEX)


| पाठः (Lesson) | विषयः (Topic) | पृष्ठसंख्या (Page No.) |
|---|---|---|
| 1. प्रथमः पाठः | मृदुरै | 1 |
| 2. द्वितीयः पाठः | राज्ञः औदार्यम् | 8 |
| व्याकरण-अभ्यासः - 1 | मरुत् शब्दः, एक शब्दः | |
| अनुच्छेदः & अनुवादः | अनुच्छेदः - 1 & अनुवादः - 1 | |
| 3. तृतीयः पाठः | सुन्दरसुरभाषा | 14 |
| 4. चतुर्थः पाठः | लोकोक्तयः | 20 |
| व्याकरण-अभ्यासः - 2 | धातुः - परस्मैपदी - लुट् लकारः | |
| घटनाक्रमः & पत्रलेखनम् | घटनाक्रमः - 1 & पत्रलेखनम् - 1 | |
| 5. पञ्चमः पाठः | संस्कृतसुभाषितानि | 26 |
| 6. षष्ठः पाठः | दयापरः दधीचिः | 32 |
| व्याकरण-अभ्यासः - 3 | वाच् शब्दः, द्वि शब्दः | |
| अनुच्छेदः & अनुवादः | अनुच्छेदः - 2 & अनुवादः - 2 | |
| 7. सप्तमः पाठः | वृक्षविज्ञानम् | 38 |
| 8. अष्टमः पाठः | योगासनानि | 45 |
| व्याकरण-अभ्यासः - 4 | धातुः - परस्मैपदी - लोट् लकारः | |
| घटनाक्रमः & पत्रलेखनम् | घटनाक्रमः - 2 & पत्रलेखनम् - 2 | |
| 9. नवमः पाठः | चन्द्रोदयवर्णनम् | 51 |
| 10. दशमः पाठः | वैपरीत्यम् | 58 |
| व्याकरण-अभ्यासः - 5 | जगत् शब्दः, त्रि शब्दः | |
| अनुच्छेदः & अनुवादः | अनुच्छेदः - 3 & अनुवादः - 3 | |
| 11. एकादशः पाठः | प्रहेलिकाः | 65 |
| 12. द्वादशः पाठः | ध्रुवचरितम् | 71 |
| व्याकरण-अभ्यासः - 6 | धातुः - परस्मैपदी - लृङ् लकारः | |
| घटनाक्रमः & पत्रलेखनम् | घटनाक्रमः - 3 & पत्रलेखनम् - 3 | |
| वर्णावृत्तिः | अक्षरपरिचयः | |

# मङ्गलाचरणम्

## ऐक्यमन्त्रः

यं वैदिका मन्त्रदृशः पुराणाः
इन्द्रं यमं मातरिश्वानमाहुः ।
वेदान्तिनोऽनिर्वचनीयमेकं
यं ब्रह्मशब्देन विनिर्दिशन्ति ।। ।।1।।

शैवा यमीशं शिव इत्यवोचन्
यं वैष्णवा विष्णुरिति स्तुवन्ति ।
बुद्धस्तथार्हन्निति बौद्धजैनाः
सच्छ्री अकालेति च सिक्खसन्तः।। ।।2।।

शास्तेति केचित् कतिचित् कुमारः
स्वामीति मातेति पितेति भक्त्या
यं प्रार्थयन्ते जगदीशितारं
स एक एव प्रभुरद्वितीयः ।। ।।3।।



Introduction Pages.indd 7 22-03-2019 15:36:32

“Sanskrit is like the river Ganga for our languages, If it were to dry up, the regional languages also would lose their vitality and power.”

**– Mahatma Gandhiji**

“The past has gone and the present is with us and we work for thefuture, But I have no doubt that whatever shape that future may take, one of the biggest, the strongest and the most powerful and the most valued, of our legacies will be the Sanskrit language.”

**– Pandit Jawaharlal Nehru**

“Sanskrit is the most suitable language that could be made the official language.”

**– Dr. Ambedkar**

“I often wonder which is the most important of the many things that have distinguished India in the past, in its history of years. I have no doubt at all in my mind that it is the Sanskrit language. It is that which has embodied the genius and wisdom of our race. Almost everything that has come out in later years can somehow be found to have sprung from this ancient language only.”

**- Dr. S. Radhakrishnan**



Introduction Pages.indd 8 22-03-2019 15:36:32

प्रथमः पाठः

Lesson – 1

# मूदुरै 1

द्रविडभाषायाम् अनेके नीतिग्रन्थाः सन्ति । एते ग्रन्थाः मनुष्याणां सत्प्रवर्तनाय सुखजीवनाय च उक्ताः भवन्ति । तेषु औव्वैयार् महाभागया मूदुरै, आत्तिचूडि, कोन्ड्रैवेन्दन्, नळवळि इत्यादयः नीतिग्रन्थाः लिखिताः भवन्ति । अस्मिन् पाठे मूदुरै नाम ग्रन्थात् कतिपयाः नीतिश्लोकाः स्वीकृताः ।।



## परोपकारः -

साह्यं कृतं साधुजनाय नित्यं
तिष्ठेत् शिलायां लिखितं यथैव ।
दया विहीने रचितं तदेव
नूनं जले लेखनवत् विनश्येत् ।। 1

நல்லார் ஒருவருக்குச் செய்த உபகாரம்
கல்மேல் எழுத்துப்போல் காணுமே – அல்லாத
ஈரமில்லா நெஞ்சத்தார்க்கு ஈந்த உபகாரம்
நீர் மேல் எழுத்துக்கு நேர்

## शीलम् -

विद्यानुरूपां मतिमाप्नुवन्ति
पुण्यानुरूपं धनमार्जयन्ति ।
कुलानुरूपं तु गुणं भजन्ते
जलानुरूपाणि यथोत्पलानि ।। 2

நீர் அளவே ஆகுமாம் நீர் ஆம்பல் – தான் கற்ற
நூல் அளவே ஆகுமாம் நுண் அறிவு – மேலைத்
தவத்து அளவே ஆகுமாம் தான் பெற்ற செல்வம்
குலத்து அளவே ஆகும் குணம்



Unit 1.indd 1 18-03-2019 13:31:24

## सज्जनाः -

महात्मनां दर्शनम् उत्तमं स्यात्
महात्मवाक्यश्रवणं वरं स्यात् ।
श्रेष्ठो भवेत् साधुगुणानुवादः
श्लाघ्यो भवेत् साधुसमागमोऽपि ।। 3

நல்லாரைக் காண்பதுவும் நன்றே; நலமிக்க
நல்லார் சொல் கேட்பதுவும் நன்றே – நல்லார்
குணங்கள் உரைப்பதுவும் நன்றே அவரோடு
இணங்கி இருப்பதுவும் நன்று.

## दुर्जनः -

दुःखप्रदं दुर्जनदर्शनं स्यात्
दुःखाय वाक्यश्रवणं च तेषाम् ।
दुःखाय तेषां गुणवर्णनं स्यात्
तेषां च मैत्री जनयेद्विषादम् ।। 4

தீயாரைக் காண்பதுவும் தீதே ; திரு அற்ற
தீயார் சொல் கேட்பதுவும் தீதே – தீயார்
குணங்கள் உரைப்பதுவும் தீதே; அவரோடு
இணங்கி இருப்பதுவும் தீது

औव्वैयार् महाभागा सर्वेषां जनानां प्रियतमा विदुषी आसीत् । सा सङ्घकालीनकवयित्री। सा तगडूर् देशस्य अदियमान् नाम राज्ञः काले अजीवयत् । द्रविडभाषायां औव्वै इत्यस्य पदस्य “सुवृद्धा” अथवा तापसी इत्यर्थः । सा तमिळभाषोन्नतये महान्तं प्रयत्नम् अकरोत् ।



Unit 1.indd 2 18-03-2019 13:31:24

## अभ्यासः

### I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

| | | | |
|---|---|---|---|
| 1. | साधुजनः | - | noble people |
| 2. | शिला | - | rock |
| 3. | दया | - | mercy |
| 4. | विद्या | - | learning |
| 5. | मतिः | - | Intellect |
| 6. | धनम् | - | Wealth |
| 7. | उत्पलम् | - | lilly |
| 8. | वरम् | - | the best |
| 9. | समागमः | - | union |
| 10. | मैत्री | - | friendship |

### II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

| | | | |
|---|---|---|---|
| 1. | नित्यम् | × | अनित्यम् |
| 2. | दया | × | निर्दया |
| 3. | साधुः | × | असाधुः |
| 4. | दर्शनम् | × | अदर्शनम् |
| 5. | दुःखम् | × | सुखम् |
| 6. | सज्जनः | × | दुर्जनः |
| 7. | मैत्री | × | वैरम् |

### III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत -

| | | | |
|---|---|---|---|
| 1. | मतिमाप्नुवन्ति | - | मतिम् + आप्नुवन्ति |
| 2. | पुण्यानुरूपम् | - | पुण्य + अनुरूपम् |
| 3. | यथोत्पलानि | - | यथा + उत्पलानि |



Unit 1.indd 3 18-03-2019 13:31:24

| | | | | | |
|---|---|---|---|---|---|
| 4. | गुणानुवादः | - | गुण | + | अनुवादः |
| 5. | समागमोऽपि | - | समागमः | + | अपि |
| 6. | यथैव | - | यथा | + | एव |
| 7. | धनमार्जयन्ति | - | धनम् | + | आर्जयन्ति |

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. कस्मै कृतं साह्यं शिलालिखितमिव भवति ?
2. दया विहीने कृतम् उपकारं किमिव विनश्येत् ?
3. विद्यानुरूपां काम् आप्नुवन्ति ?
4. कं कुलानुरूपं भजन्ते ?
5. केषां दर्शनम् उत्तमं स्यात् ?
6. साधुसमागमः कथं भवेत् ?
7. केषां दर्शनं दुःखप्रदं स्यात् ?
8. दुर्जनानां मैत्री किं जनयेत् ?

## V. सविस्तरम् उत्तरं लिखत-

1. मूदुरै इति पाठात् त्रीन् श्लोकान् व्याख्यात।
2. अव्वैयार् महाभागया कथितासु उक्तिषु नीतित्रयं विवृणुत।

x------------------------x------------------------x

### ? पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

वृद्धायाः द्रविडाम्बायाः औव्वैयार् महाभागायाः सूक्तयः तत्त्वार्थबोधकाः भवन्ति। द्रविडनीतिग्रन्थेषु बहुषु, तस्याः आत्तिचूडि, कौन्ड्रैवेन्दन्, मूदुरै इति एत्रे त्रयः ग्रन्थाः प्रसिद्धाः। एते ग्रन्थाः संस्कृते आङ्लभाषायां च अनूदिताः भवन्ति। केचित् सूक्त्यनुवादाः अत्र प्रदर्श्यन्ते।



Unit 1.indd 4 18-03-2019 13:31:24

## आत्तिचूडि

| द्रविडभाषायाम् | संस्कृतभाषायाम् |
|---|---|
| கண்டொன்று சொல்லேல் | दृष्टमेकं न विब्रूयात् |
| ஙப் போல் வளை | भवेद्ववर्गोपकारकः |
| சனி நீராடு | तैलेन शन्यहे स्नायात् |
| ஞயம் பட உரை | ब्रूयान्मृदु हितं वचनम् |
| இடம் பட வீடிடேல் | पर्याप्तं सदनं कार्यम् |
| இணக்கமறிந்திணங்கு | मित्रं कुर्यात् परीक्षितम् |
| தந்தை தாய் பேண் | संरक्ष मातापितरौ |
| நன்றி மறவேல் | कृतमन्यैः न विस्मरेत् |
| பருவத்தே பயிர் செய் | यथाकालं कृषिं कुर्यात् । |

## कोन्ड्रैवेन्दन्

| द्रविडभाषायाम् | संस्कृतभाषायाम् |
|---|---|
| அன்னையும் பிதாவும் முன்னறி தெய்வம் | पितरौ वेद्यौ प्रथमौ देवौ |
| ஆலயம் தொழுவது சாலவும் நன்று | आलयसेवा नितरां श्लाघ्या । |
| இல்லறமல்லது நல்லறமன்று | नान्यो धर्मो गृहिणो धर्मात् |
| ஈயார் தேட்டை தீயார் கொள்வர் | दस्युर्भुङ्क्ते कृपणस्य धनम् |
| உண்டி சுருங்குதல் பெண்டிற்கு அழகு | भोजनसंहृतिरबलाभरणम् |
| ஊருடன் பகைக்கின் வேருடன் கெடும் | मूलघातो जनता वैरे |
| எண்ணும் எழுத்தும் கண்ணெனத் தகும் | गणितं व्याकृतिरिति नेत्रसमम् |
| ஏவா மக்கள் மூவா மருந்து | पुत्रोऽमृतमिह पितुरनुकूलः |



Unit 1.indd 5 18-03-2019 13:31:24

| | |
|---|---|
| ஐயம்புகினும் செய்வன செய் | याच्ञायामपि विहितं कार्यम् |
| ஒருவனைப் பற்றி ஓரகத்திரு | देशे वस सत्सुहृदवलम्बी |
| ஔவியம் பேசுதல் ஆக்கத்திற்கழிவு | ईर्ष्यावादो धननाशाय |
| அஃகமும் காசும் சிக்கனத் தேடு | धनधान्यं व्ययरहितं चेयम् । |

## पाठ्यातिरिक्तः व्याकरणविषयः

### वर्णाः उच्चारणस्थानानि च

| वर्णानाम् उच्चारण स्थानानि | स्वरः | | वर्गीयव्यञ्जनानि / स्पर्शाः | | | | | अन्तःस्थाः | ऊष्माणः | वर्णानां जन्य स्थानानि |
|---|---|---|---|---|---|---|---|---|---|---|
| कण्ठः | अ | आ | क् | ख् | ग् | घ् | ङ् | - | ह् | कण्ठ्यम् |
| तालुः | इ | ई | च् | छ् | ज् | झ् | ञ् | य् | श् | तालव्यम् |
| मूर्धा | ऋ | ॠ | ट् | ठ् | ड् | ढ् | ण् | र् | ष् | मूर्धन्यम् |
| दन्तः | ऌ | - | त् | थ् | द् | ध् | न् | ल् | स् | दन्त्यम् |
| ओष्ठः | उ | ऊ | प् | फ् | ब् | भ् | म् | - | - | ओष्ठ्यम् |
| नासिका | - | - | ङ् | ञ् | ण् | न् | म् | - | - | नासिक्यम् |
| कण्ठतालु | ए | ऐ | - | - | - | - | - | - | - | कण्ठतालव्यम् |
| कण्ठोष्ठम् | ओ | औ | - | - | - | - | - | - | - | कण्ठोष्ठ्यम् |
| दन्तोष्ठम् | - | - | - | - | - | - | - | व् | - | दन्तोष्ठ्यम् |



Unit 1.indd 6 18-03-2019 13:31:24

# माहेश्वराणि सूत्राणि

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| अ | इ | उ | ण् | | | | | |
| ऋ | ऌ | क् | | | | | | |
| ए | ओ | ङ् | | | | | | |
| ऐ | औ | च् | | | | | | |
| ह | य | व | र | ट् | | | | |
| ल | ण् | | | | | | | |
| ञ | म | ङ | ण | न | म् | | | |
| झ | भ | ञ् | | | | | | |
| घ | ढ | ध | ष् | | | | | |
| ज | ब | ग | ड | द | श् | | | |
| ख | फ | छ | ठ | थ | च | ट | त | व् |
| क | प | य् | | | | | | |
| श | ष | स | र् | | | | | |
| ह | ल् | | | | | | | |

## प्रत्याहारः

प्रत्याह्रियन्ते वर्णाः अस्मिन् अनेन वा इति प्रत्याहारः ।

यथा

1. अण् - अ इ उ
2. अक् - अ इ उ ऋ ऌ
3. इक् - इ उ ऋ ऌ
4. एङ् - ए ओ
5. अच् - अ इ उ ऋ ऌ ए ओ ऐ औ
6. ऐच् - ऐ औ
7. यण् - य व र ल
8. हश् - ह य व र ल ञ म ङ ण न
   झ भ घ ढ ध ज ब ग ड द

एवं यट्, झट्, खट्, चर्, झल् इत्यादयः सन्ति ।।



Unit 1.indd 7 18-03-2019 13:31:24

द्वितीयः पाठः

Lesson – 2

# राज्ञः औदार्यम् 2

द्रविडदेशे बहवः औदार्यशीलाः आसन् । तेषु "पेगः, पारि, कारि, आय्, अदियमान्, नळ्ळि, ओरि" इत्येते सप्त मुख्याः। द्रविडग्रन्थेषु एते "कडै एळु वल्लल्कल्" इति नाम्ना व्यवह्रियन्ते। तेषु "अदियमान्" इति नृपः अन्यतमः । सः स्वेन प्राप्तम् अपूर्वामलकम् औव्वैयार् नाम विदुष्यै दत्वा यशः प्राप्तवान्। तमधिकृत्य अस्मिन् पाठ्यभागे कथा उल्लिखिता।



पुरा अदियमान् नाम राजा तगडूर् नाम देशं शशास । सः औव्वैयार् महाभागायाः प्रीतिपात्रः आसीत् । सः राजा अनेकसदुक्तिभिः तया प्रशंसितः आसीत् । सः अदियमान् शौर्यादि सद्गुणैः संपूर्णः आसीत् ।

एकदा कवयित्री औव्वैयार् तं द्रष्टुं तस्य नगरम् आजगाम । राजा तां संयक् प्रत्युद्गम्य उपचचार । तदा सा विदुषी प्रजापालनम् अधिकृत्य अपृच्छत् । सः राजा अञ्जलिं बद्ध्वा "अम्ब ! भवत्याः प्रसादेन



Unit 2.indd 8 18-03-2019 13:32:35

(अनुग्रहेण) प्रजापालनं संयक् प्रचलति ” इति उवाच । तदनन्तरं सः राजा एकं दिव्यम् आमलकं तस्यै अदात् । सापि तत् रुचिकरं फलं भुक्त्वा तस्य वैशिष्ट्यं किमिति राजानम् अपृच्छत् । राजा तत्फलम् अधिकृत्य एवम् उवाच – “मातः! इदम् आमलकम् अत्यद्भुतं, सामान्यतया लब्धुम् अशक्यं च । यः इदं भक्षयेत् तस्य दीर्घायुः भवेत् ” इत्यवोचत्। तच्छ्रुत्वा विस्मिता सा “हे राजन्, एतादृशम् आमलकं मह्यम् किमर्थम्?, वृद्धावस्थायां स्थितायै मह्यम् इदं न अपेक्षितम् । यदि त्वम् आस्वादयिष्यत्, तर्हि वरम् अभविष्यत् खलु” इति अवोचत्।

तत् श्रुत्वा राजा “अम्ब ! मादृशानां राज्ञां दीर्घकालजीवनात् अपि भवादृशीनां कवयित्रीणां बहुकालजीवनमेव वरम् ” इति मत्वैव मया इदं फलं भवत्यै अर्पितम् इति उक्त्वा ताम् अनमत् ।

तदाकर्ण्य विस्मिता कवयित्री, पण्डितवात्सल्यः तस्य राज्ञः औदार्यं, औन्नत्यं च विज्ञाय तस्मै आशिषं दत्वा अगमत् । ततः सा कवयित्री बहुकालं जीवनं कृत्वा द्रविडभाषायै सेवाम् अकरोत् ।

## अभ्यासः

### I. कठिनशब्दार्थः-

| | | | |
|---|---|---|---|
| 1. | पुरा | - | long ago |
| 2. | शशास | - | ruled |
| 3. | प्रीतिपात्रम् | - | beloved person |
| 4. | प्रशंसितः | - | praised |
| 5. | अन्यतमः | - | one among |
| 6. | कवयित्री | - | poetess |
| 7. | प्रसादेन | - | by blessing |
| 8. | आमलकम् | - | gooseberry (fruit) |
| 9. | वैशिष्ट्यम् | - | speciality |
| 10. | दीर्घायुः | - | long life |
| 11. | विस्मिता | - | surprised |
| 12. | वृद्धावस्था | - | old age |
| 13. | अपेक्षितम् | - | desire |
| 14. | औदार्यम् | - | nobility |



Unit 2.indd 9 18-03-2019 13:32:35

| | | | |
|---|---|---|---|
| 15. | औन्नत्यम् | - | greatness |
| 16. | सेवा | - | service |

## II. योजयत-

| | | | |
|---|---|---|---|
| 1. | अदियमान् | - | कवयित्री |
| 2. | औव्वैयार् | - | रुचिकरं फलम् |
| 3. | आमलकम् | - | सप्त |
| 4. | तगडूर् | - | पण्डितवात्सल्यः |
| 5. | औदार्यशीलाः | - | देशस्य नाम |

## III. कोष्ठात् उचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. अदियमान् __________ (राजा / अमात्यः)
2. अदियमान् __________ उदारशीलेषु अन्यतमः (अष्ट / सप्त)
3. आमलकं __________ (रुचिः / अरुचिः)
4. औव्वैयार् __________ सेवाम् अकरोत् (संस्कृतभाषायै / द्रविडभाषायै)
5. अदियमान् ________ प्रीतिपात्रः अभवत् (प्रजायाः / औव्वैयार् महाभागायाः)

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. अदियमान् कं देशं शशास ?
2. अदियमान् कस्याः प्रतिपात्रः आसीत् ?
3. अदियमान् कैः संपूर्णः आसीत् ?
4. राजा औव्वैयार् महाभागायै किम् अदात् ?
5. औव्वैयार् कस्यै सेवाम् अकरोत् ?

## V. सविस्तरम् उत्तरं लिखत-

1. अदियमान् राज्ञः औदार्यं यथाग्रन्थं विशदयत ।
2. औव्वैयार् – अदियमान् इत्यनयोः संभाषणं यथाग्रन्थं लिखत ।

x------------------------x------------------------x

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

सङ्घकाव्येषु अन्तर्गतस्य पत्तुप्पाट्टु इति ग्रन्थस्य तृतीयपद्यं सिरुम्पाणाट्रुप्पडै (சிறும்பாணாற்றுப்படை) इति । अस्य रचयिता नल्लूर् नत्तत्तनार् (நல்லூர் நத்தத்தனார்) भवति । अस्मिन् ग्रन्थे तमिळभाषायां मुख्यानां सप्त - औदार्यशीलानां (கடை ஏழுவள்ளல்கள்) महत्वं वर्णितं भवति । तान् अधिकृत्य एट्टुत्तोगै (எட்டுத் தொகை) नाम ग्रन्थः अपि वर्णयति ।

सप्त औदार्यशीलाः –

1. पेगः - पेगः पळनि गिरेः (பழனிமலையின்) नृपः । सः शैत्येन दुःखितस्य मयूरस्य कृते स्वकम्बलं दत्तवान् ।।

2. पारिः – पारिः परम्बुगिरेः नृपः । सः वेळ् पारि इति नाम्ना विश्रुतः । सः वनमार्गेण गच्छन्, तत्रस्थ - मालती - लतायै स्वीयं रथं दत्तवान् । तम् उद्दिश्य कपिलः नाम कविः पुरनानूरु ग्रन्थे लिखितवान् ।

3. कारिः – अयं तिरुक्कोविलूर् नाम नगरीं राजधानीं विधाय मलाटदेशं शशास । अयं तिरुमुडिक्कारि (திருமுடிக்காரி) कोवर्कोमान् (கோவர் கோமான்) इत्यादि नाम्ना विश्रुतः । सः घण्टामणि तथा चूडामणि युक्त उत्तमान् हयान् याचकेभ्यः दत्तवान् । तमधिकृत्य पेरुञ्चात्तनार्, नप्पसलैयार् इत्यादयः कवयः पुरनानूरुग्रन्थे वर्णितवन्तः ।

4. आय् – अयं पोदिगै गिरेः समीपस्थ आय्कुडि नाम स्थानस्य अधिपतिः आसीत् । इमं वेळ् आय् इत्यपि जनाः व्यवह्रियन्ते । एकदा प्रकाशयुक्तनीलसर्पः दुर्लभं वस्त्रं तस्मै राज्ञे अदात् । सः नृपः तं, वटस्थ परमेश्वराय अर्पितवान् । तमधिकृत्य उरैयूर् एणिच्छोरि मुडमोचियार् तूरैयूर् ओडैक्किळार् नाम कवी पुरनानूरुग्रन्थे वर्णितवन्तौ ।

5. अदियमान् – इमम् अधिकृत्य अस्मिन् पाठे एव वर्णितं भवति ।

6. नळ्ळि – गिरिभिः परिवृतः कण्डीरदेशस्य राजा । अयं नळ्ळिमलैनाडन्, पेरुनळ्ळि, कण्डीरकोप्पेरुनळ्ळि इति अनेकनाम्ना व्यपदिश्यते । अयं स्वसमीपे आगतानां याचकानां कृते बहूनि आभरणानि तथा धनानि दत्वा अतोषयत् । ते याचकाः पुनः याचनार्थं कुत्रापि न अगच्छन्। इत्थं तस्य प्रथमार्थिनः एव इतरयाचकानां मनोरथान् अपूरयन् ।

7. ओरि – अयमपि गिरिभिः परिवृतदेशस्य राजा । अयं धनुर्युद्धे प्रशस्तः आसीत् । अतः एव सः "वल्विल् ओरि" (வல்வில் ஓரி) इति व्यवह्रियते । अयं नृपः बहुवृक्षपरिवृतं तटाकयुक्तं रमणीयदेशं नर्तकेभ्यः अदात् । पण्भाणः (பண்பாணர்) नाम कविः पुरनानूरु ग्रन्थे तमधिकृत्य अवर्णयत् ।

एवं एते सप्त औदार्यशीलानां प्रशस्तिः ने केवलं पुरनानूरु – ग्रन्थे, अपि च नट्रिणै, अहनानूरु इत्यनयोः ग्रन्थयोः अपि वर्णिता भवति ।



Unit 2.indd 11 18-03-2019 13:32:36

## व्याकरण-अभ्यासः - 1

| तकारान्तः पुंलिङ्गः"मरुत्" शब्दः (wind) | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | मरुत् | मरुतौ | मरुतः |
| द्वितीया | मरुतम् | मरुतौ | मरुतः |
| तृतीया | मरुता | मरुद्भ्याम् | मरुद्भिः |
| चतुर्थी | मरुते | मरुद्भ्यां | मरुद्भ्यः |
| पञ्चमी | मरुतः | मरुद्भ्यां | मरुद्भ्यः |
| षष्ठी | मरुतः | मरुतोः | मरुताम् |
| सप्तमी | मरुति | मरुतोः | मरुत्सु |
| सं.प्र | हे मरुत् | हे मरुतौ | हे मरुतः |

| एकशब्दः नित्यमेकवचनान्तः (one) | | | |
|---|---|---|---|
| विभक्तिः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
| प्रथमा | एकः | एका | एकम् |
| द्वितीया | एकम् | एकाम् | एकम् |
| तृतीया | एकेन | एकया | एकेन |
| चतुर्थी | एकस्मै | एकस्यै | एकस्मै |
| पञ्चमी | एकस्मात् | एकस्याः | एकस्मात् |
| षष्ठी | एकस्य | एकस्याः | एकस्य |
| सप्तमी | एकस्मिन् | एकस्याम् | एकस्मिन् |



Unit 2.indd 12 18-03-2019 13:32:36

## अनुच्छेदलेखनम् –1

इक्षुः उन्नततया वर्धते। इक्षुं निपीड्य रसः सम्पाद्यते। इक्षुरसः अतीव मधुरः। इक्षुरसः कटाहे निक्षिप्य अग्निना शोष्यते। तत् गुडं भवति। गुडेन कृतः अपूपः पायसं च मधुरे भवतः।।

इक्षुं यन्त्रेषु प्रक्षिप्य शर्करां कुर्वन्ति। शर्करायाः वर्णः श्वेतः। गुडस्य वर्णः रक्तः। शर्करया क्रियमाणानि भक्ष्याणि अतीव मधुराणि भवन्ति। अस्मद्देशे बहवः शर्करालयाः सन्ति।

प्रश्नाः-



1.इक्षुः कथं वर्धते ?

2. इक्षुरसः कीदृशः ?

3. इक्षुरसः केन शोष्यते ?

4. शर्करां कथं कुर्वन्ति ?

5. गुडस्य शर्करायाश्च वर्णः कः?

## अनुवादः – 1



आसीत् ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती। तम् अवलोक्य सर्वे शृगालाः चिन्तयन्ति स्म – यद्ययं केनाप्युपायेन म्रियेत, तर्हि मासचष्ट्यस्य भोजनं भविष्यति इति। तदा एकेन वृद्धशृगालेन उक्तं – मया बुद्धिप्रभावात् अस्य मरणं साधयितव्यम् इति। सः कर्पूरतिलकसमीपं गत्वा उवाच- "देव! दृष्टिप्रसादं कुरु" इति। हस्ति ब्रूते – "कस्त्वम्? कुतः समायातः" इति। सः (शृगालः) अवदत्- जम्बुकः अहं सर्वैः वनवासिभिः मिलित्वा भवत्सकाशं प्रस्थापितः। अत्र अटवीराज्ये सर्वे भवन्तं अभिषित्तुम् इच्छन्ति। अतः "सत्वरम् आगम्यतां देवेन" इति। तत् श्रुत्वा राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन् महापङ्के निमग्नः शृगालैः भक्षितश्च।



Unit 2.indd 13 18-03-2019 13:32:37

तृतीयः पाठः

Lesson – 3

# सुन्दरसुरभाषा 3

सुन्दरसुरभाषा इत्ययं पद्यभागः श्री नारायणभट्टाचार्येण विरचितः। सर्वेषामपि जनानां सरलसंस्कृतप्रचारार्थं संस्कृतसभापरिषद् 7.12.1982 तमे वर्षे समारब्धा। तस्यां सभायां प्रथमं प्रकाशनं “गीतसंस्कृतम्” नाम ग्रन्थः । अस्मात् ग्रन्थात् पाठः अयं स्वीकृतः । अस्मिन् पाठ्यभागे संस्कृतस्य औन्नत्यं अतिसुलभतया वर्णितं भवति ।




मुनिवरविकसित – कविवरविलसित-

मञ्जुलमञ्जूषा सुन्दरसुरभाषा ।

अयि मातस्तव पोषणक्षमता

मम वचनातीता सुन्दरसुरभाषा ।। 1



Unit 3.indd 14 18-03-2019 13:33:46

वेदव्यास-वाल्मीकि-मुनीनाम्
कालिदास – बाणादिकवीनाम् ।
पौराणिक – सामान्य – जनानाम्
जीवनस्य आशा, सुन्दरसुरभाषा ।। 2

श्रुतिसुखनिनदे सकलप्रमोदे
स्मृतिहितवरदे, सरसविनोदे ।
गति-मति-प्रेरक-काव्यविशारदे
तव संस्कृतिरेषा सुन्दरसुरभाषा ।। 3

नव रस – रुचिरालङ्कृति – धारा
वेदविषय-वेदान्तविचारा ।
वैद्य – व्योम – शास्त्रादि – विहारा
विजयते धरायां सुन्दरसुरभाषा ।। 4

श्रीनारायणभट्टः संस्कृतकविषु अन्यतमः। अयं गोविन्ददासकलाशालायां संस्कृतोपन्यासकः। अयम् अतीव राष्ट्रभक्तः। अस्य देशभक्तिः अनेन विरचितात् "वयं हिन्दुसञ्जाताः सर्वे" इति पद्यात् अवगम्यते। तत्र "मम जननी भारतमाता, पुत्रोऽहं सेवा कर्ता" इति अनेन अस्य संस्कृतभाषायाम् अभिरुचिः ज्ञायते । अनेन अस्यां भाषायां बहवः कृतयः विरचिताः।

## अभ्यासः

I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. सुरभाषा - divine language
2. जीवनम् - life
3. पौराणिकः - person having knowledge of Purana
4. श्रुतिः - Veda



Unit 3.indd 15 18-03-2019 13:33:46

| | | | |
|---|---|---|---|
| 5. | प्रेरकः | - | motivater |
| 6. | व्योम | - | sky |
| 7. | वैद्यः | - | doctor |
| 8. | धरा | - | the earth |
| 9. | आशा | - | desire |
| 10. | वरदा | - | bestowes |

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

| | | | |
|---|---|---|---|
| 1. | सुन्दरः | × | असुन्दरः |
| 2. | सुराः | × | असुराः |
| 3. | जीवनम् | × | मरणम् |
| 4. | पोषणम् | × | शोषणम् |
| 5. | हितम् | × | अहितम् |

## III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत –

| | | | |
|---|---|---|---|
| 1. | वचनातीता | - | वचन + अतीता |
| 2. | मातस्तव | - | मातः + तव |
| 3. | संस्कृतिरेषा | - | संस्कृतिः + एषा |
| 4. | रुचिरालङ्कृतिः | - | रुचिः + आलङ्कृतिः |
| 5. | शास्त्रादि | - | शास्त्र + आदि |

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. सुन्दरसुरभाषा का ?
2. आदिकविः कः ?
3. महाभारतकर्ता कः ?
4. संस्कृतभाषा कैः अलंकृता भवति ?
5. सुन्दरसुरभाषा कुत्र विजयते ?

x-------------------------x-------------------------x

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

संस्कृतभाषा अतीव प्राचीनतमा बहुभाषाणां मातृस्थानीया भवति । अस्यां भाषायां द्विवचनप्रयोगः प्रशंसनीयः वर्तते । यतः लोके सर्वत्र द्वन्द्वं वर्तते । जीवेषु स्त्रीपुरुषौ इति, अर्थेषु सुखदुःखे, लाभालाभौ, जयाजयौ इत्यादौ द्वन्द्वं, देहाङ्गेषु नेत्रद्वयं, कर्णद्वयं, पादद्वयम् इत्यादि द्वन्द्वं पश्यामः । एतत्सर्वं द्विवचनप्रयोगेन भाषायाः प्रकृतौ विद्यमानं स्नेहभावमेव द्योतयति।

संस्कृतभाषायां श्रीनारायणभट्टाचार्यः बहुसेवां अकरोत् । अनेन अस्यां भाषायां बहवः कृतयः विरचिताः । ताः – “वयं हिन्दुसञ्जाताः सर्वे, हिमगिरेः शृङ्गम्, चिरनवीना संस्कृता एषा” इत्यादयः । तस्य कृतितः केचन उदाहरणानि अत्र निर्दिश्यन्ते -

### वयं हिन्दुसञ्जाताः सर्वे -

वयं हिन्दुसञ्जाताः सर्वे अस्माकं पुण्यम् पावनराष्ट्रं भावय श्रेष्ठम् ।
जननमपि दुर्लभमत्र  दैवमपि सिद्ध्यति तत्र ।।
कर्मफलापेक्षहीनाः धर्मे निष्ठाः कर्ममुखेन ।
अस्मासु  नास्ति च भेदः अस्मासु नास्ति च वादः ।
भिन्नतं एकीकृत्य  संगच्छेमहि संवदेमहि ।।
मम जननी भारतमाता  पुत्रोऽहं सेवा कर्ता ।
एवमेव कृत्वा भावं   सत्यं वदाम चराम धर्मम् ।।

### हिमगिरेः शृङ्गम् -

हिमगिरेः शृङ्गं देवनदीं गङ्गां
    मनसि निधाय हि अनुभवामः ।
अनुपममुत्तुङ्गं भावं अनुपममुत्तुङ्गम्
    दिव्य सनातन-संस्कृति यतो हि वेदपुराणानि ।।
हिन्दोरुन्नत्यवनत्योः
    सदृशानि गिरिशिखराणि ।
भीरुमनस्यापि धीरस्वभावं
    जनयेयुर्हिमभवनानि ।।

### चिरनवीना संस्कृता एषा

चिरनवीना संस्कृता एषा गीर्वाणभाषा
    चिरनवीना संस्कृता एषा
महतो भूतस्य निःश्वसितं
    अस्ति यस्यां अतिपुरातनवेद साहित्यं
शास्त्रपूरैः स्मृतिविचारैः वरकवीनां काव्यसारैः
    चित्रिता मञ्जुलमंजूषा मञ्जुलभाषा ।।

## पाठ्यातिरिक्तः व्याकरणविषयः
## अव्ययानि

| | अव्ययानि | | उदाहरणम् |
|---|---|---|---|
| 1. | यत्र – तत्र | - | सः यत्र गच्छति, तत्र खादति । |
| 2. | सर्वत्र | - | ईश्वरः सर्वत्र अस्ति । |
| 3. | अत्र | - | त्वम् अत्र आगच्छ । |
| 4. | कुत्र | - | छात्राः कुत्र अगच्छन् ? |
| 5. | अन्यत्र | - | त्वम् अन्यत्र तिष्ठ । |
| 6. | इतः | - | त्वम् इतः गच्छ । |
| 7. | ततः | - | सीता ततः आगच्छति । |
| 8. | इतस्ततः | - | वानरः इतस्ततः धावति । |
| 9. | कुतः | - | गङ्गा कुतः उद्भवति ? |
| 10. | उपरि | - | धूमः उपरि गच्छति । |

एवं नीचैः, अधः, बहिः, परितः, उभयतः, सर्वतः इत्यादीनि

### कालवाचकानि अव्ययानि

| | अव्ययानि | | उदाहरणम् |
|---|---|---|---|
| 1. | अधुना | - | त्वम् अधुना किं करोषि ? |
| 2. | इदानीम् | - | अहम् इदानीं पाठं पठामि । |
| 3. | ह्यः | - | ह्यः अहं जन्तुशालाम् अगच्छम् । |
| 4. | अद्य | - | अद्य शनिवासरः । |
| 5. | श्वः | - | श्वः त्वं कुत्र गमिष्यसि ? |
| 6. | परश्वः | - | परश्वः दीपावली अस्ति । |

एवं संप्रति, पुरा, यदा-तदा, कदा, सदा, सर्वदा इत्यादीनि

### प्रश्नवाचकानि अव्ययानि

| | अव्ययानि | | उदाहरणम् |
|---|---|---|---|
| 1. | कदा | - | सः कदा आगच्छति ? |
| 2. | किमर्थम् | - | त्वं तत्र किमर्थं गच्छसि ? |
| 3. | कुत्र | - | रामः कुत्र वसति ? |
| 4. | कुतः | - | सत्यभामा कुतः आगच्छति ? |
| 5. | कथम् | - | राघवः कथं गच्छति ? |
| 6. | कति | - | तत्र कति वृक्षाः सन्ति ? |



Unit 3.indd 18 18-03-2019 13:33:46

## क्रियाविशेषणबोधकानि अव्ययानि

| | | | |
|---|---|---|---|
| 1. | शनैः शनैः | - | हंसः शनैः शनैः चलति । |
| 2. | शीघ्रम् | - | त्वं शीघ्रम् आगच्छ । |
| 3. | उच्चैः | - | मेघाः उच्चैः गर्जन्ति । |
| 4. | मन्दम् | - | कच्छपः मन्दं गच्छति । |
| 5. | सहसा | - | कृष्णः सहसा खादति । |

## समुच्चयार्थकानि अव्ययानि

| | | | |
|---|---|---|---|
| 1. | अपि | - | सः अपि आगच्छति । |
| 2. | च | - | गोविन्दः कृष्णः च पाठं पठतः । |
| 3. | तु | - | सः तु अत्रैव पठति । |

## अन्य – अव्ययानि

| | | | |
|---|---|---|---|
| 1. | एव | - | मुकुन्दः एव पाठं पठति । |
| 2. | खलु | - | अयं खलु चौरः अस्ति । |
| 3. | वृथा | - | समुद्रे वृष्टिः वृथा भवति । |
| 4. | सत्वरम् | - | रमेशः सत्वरं कार्यं करोति । |
| 5. | विना | - | विद्यया विना मानवः न शोभते । |
| 6. | यावत् – तावत् | - | यावत् गोपालः भाषणं यच्छति तावत् अत्र एव तिष्ठ। |
| 7. | इव | - | सः वैभवः इव वदति । |
| 8. | मा | - | तत्र मा गच्छ । |
| 9. | एकदा | - | एकदा अहं ग्रामम् अगच्छम् । |
| 10. | न | - | असत्यं न वद । |

चतुर्थः पाठः

Lesson – 4

# लोकोक्तयः

4

लोकोक्तयः मानवजीवनस्य दैनंदिन व्यवहारस्य सारः । लोके समाजे वा प्रचलिताः उक्तयः एव लोकोक्तयः इति कथ्यन्ते । एताभिः लोकस्य व्यवहारिकम् अनुभवं नैतिक ज्ञानं च वर्धते । एतासां प्रभावः चिरस्थायी भवति । अतः ताभ्यः काश्चित् उक्तयः अत्र प्रदीयन्ते ।




1. उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।
2. धैर्येण जेया विपद् ।
3. दरिद्रता धीरतया विराजते ।
4. दण्डस्य अनुपयोगेन बालः दुर्ललितः भवेत्।
5. दुःसङ्गात् एकाकी वरम् ।
6. दूरतः पर्वताः रम्याः ।
7. जिह्वायत्तौ वृद्धिविनाशौ ।

8. जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।

9. सहसा विदधीत न क्रियाम्।

10. सर्वं परवशं दुःखम्।

11. अर्धो घटो घोषमुपैति नूनम्।

12. सूची प्रवेशे मुसलः प्रवेशः।

13. सन्दीप्ते भवने तु कूपखननम् अयुक्तम्।

14. दुर्लभं भारते जन्म मानुष्यं तत्र दुर्लभम्।

15. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

## अभ्यासः

### I. कठिनशब्दार्थः-

| | | | |
|---|---|---|---|
| 1. | मनोरथैः | - | by wishes |
| 2. | उद्यमः | - | effort |
| 3. | धैर्यम् | - | courage |
| 4. | एकाकी | - | alone |
| 5. | पर्वतः | - | mountain |
| 6. | रम्याः | - | beautiful |
| 7. | वृद्धिः | - | development |
| 8. | विनाशः | - | destruction |
| 9. | जलबिन्दुः | - | drop of water |
| 10. | क्रिया | - | action |
| 11. | परवशम् | - | dependent |
| 12. | अर्धः | - | half |
| 13. | घोषः | - | sound / noise |
| 14. | नूनम् | - | certainly |
| 15. | सूची | - | needle |



Unit 4.indd 21 22-03-2019 15:37:03

16. भवनम् - house

17. कूपखननम् - digging of a well

18. जन्म - birth

19. जननी - mother

20. जन्मभूमिः - motherland

21. स्वर्गः - heaven

22. गरीयसी - great

## II. योजयत-

1. उद्यमः - भारतम्
2. क्रिया - कार्यसाधकः
3. परवशम् - त्वरया न कर्तव्या
4. जन्मभूमिः - दुर्लभम्
5. मानुषजन्म - दुःखम्

## III. कोष्ठात् उचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. विपद् जेया __________ (धैर्येण / धनेन)
2. जलबिन्दुना __________ पूर्यते (घटः / पटः)
3. दण्डस्य अनुपयोगेन बालः __________ भवेत्। (मूर्खः / दुर्ललितः)
4. सन्दीप्ते भवने __________ अयुक्तम् (कूपखननम् / सुरङ्गखननम्)
5. जननी जन्मभूमिश्च __________ अपि गरीयसी (स्वर्गात् / नरकात्)

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. दूरतः पर्वताः कीदृशाः ?
2. सहसा का न कर्तव्या ?
3. दरिद्रता कया विराजते ?
4. दुःसङ्गात् किं वरम् ?
5. कीदृशः घटः घोषमुपैति ?
6. दुर्लभं जन्म किम् ?

V. सविस्तरम् उत्तरं लिखत-

1. पञ्च लोकोक्तीः लिखित्वा तासाम् अर्थं लिखत ।
2. यथेष्टं लोकोक्तितः पञ्चबिन्दून् सानुवादं लिखत ।

x------------------------x------------------------x

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

| | लोकोक्तयः | काव्यानि | आचार्यः/ कर्ता / संपादकः |
|---|---|---|---|
| 1. | शरीरम् आद्यं खलु धर्मसाधनम् | कुमारसंभवम् | कालिदासः |
| 2. | आर्जवं हि कुटिलेषु न नीतिः | नैषधीयचरितम् | श्रीहर्षः |
| 3. | यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्? | चाणक्यनीतिः | चाणक्यः |
| 4. | सर्वे गुणाः काञ्चनमाश्रयन्ति | नीतिशतकम् | भर्तृहरिः |
| 5. | सः सुहृद्व्यसने यः स्यात् | पञ्चतन्त्रम् | विष्णुशर्मा |
| 6. | यो यद् वपसि बीजं हि लभते सोऽपि तत्फलम् | कथासरित्सागरः | सोमदेवभट्टः |
| 7. | मौनं विधेयः सततं सुधी | सुभाषितरत्नभाण्डकारः | आचार्यः नारायणरामः |
| 8. | को धर्मः कृपया विना | सुभाषितरत्नभाण्डकारः | आचार्यः नारायणरामः |
| 9. | यादृशी भावना यस्य सिद्धिः भवति तादृशी | पञ्चतन्त्रम् | विष्णुशर्मा |



Unit 4.indd 23 22-03-2019 15:37:03

## व्याकरण-अभ्यासः - 2

### धातुः - परस्मैपदी - लुट् (I Future)

### भू (भव्) - to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविता | भवितारौ | भवितारः |
| मध्यमपुरुषः | भवितासि | भवितास्थः | भवितास्थ |
| उत्तमपुरुषः | भवितास्मि | भवितास्वः | भवितास्मः |

### वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदिता | वदितारौ | वदितारः |
| मध्यमपुरुषः | वदितासि | वदितास्थः | वदितास्थ |
| उत्तमपुरुषः | वदितास्मि | वदितास्वः | वदितास्मः |

### पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिता | पठितारौ | पठितारः |
| मध्यमपुरुषः | पठितासि | पठितास्थः | पठितास्थ |
| उत्तमपुरुषः | पठितास्मि | पठितास्वः | पठितास्मः |



Unit 4.indd 24 22-03-2019 15:37:03

## घटनाक्रमः - 1

अधो लिखितानि वाक्यानि घटनाक्रमेण संयोजयत -

1. भारदेशस्य चरणौ समुद्रः क्षालयति ।
2. अस्य मस्तकं हिमालयः भवति ।
3. अस्य हृदयं मध्यप्रदेशः ।
4. अस्य भुजौ असाम् पञ्जाब् प्रदेशौ ।
5. भारतदेशस्य मकुटं काश्मीर प्रदेशः ।

## पत्रलेखनम् - 1

### बन्धुगृहे विवाहार्थं विरामपत्रम्

स्थानं ______

दिनाङ्कः ______

प्रेषकः

XXXX (नाम)
दशमकक्ष्या
संस्कृतपाठशाला
चेन्नै

प्रापकः

प्रधानाध्यापकः
संस्कृतपाठशाला
चेन्नै

आर्य! नमस्ते,

मम बन्धु गृहे विवाहः भविष्यति । तदर्थं गन्तुम् इच्छामि । अतः ________ दिनाङ्कात् आरभ्य ________ दिनाङ्कपर्यन्तं कृपया विरामः देयः इति सविनयं प्रार्थये ।

इत्थं
भवद्विनीतः
XXXXX



Unit 4.indd 25 22-03-2019 15:37:03

पञ्चमः पाठः

Lesson – 5

# संस्कृतसुभाषितानि 5

अनुभवभूतं सत्योक्तिस्वरूपमेव सुभाषितम् । सुष्ठु उक्तं – सुभाषितम् । संस्कृतभाषायां बहूनि सुभाषितानि सन्ति । एतेभ्यः सुभाषितेभ्यः अनेकविधं ज्ञानम् अस्माभिः प्राप्यते । एतानि सुभाषितानि याः शिक्षाः ददति, ताः शिक्षाः पृथिव्यां दुर्लभाः । संस्कृते तेषां सुभाषितानां संकलनाग्रन्थः एव 'सुभाषिरत्नभाण्डाकारः' इति। अस्य संपादकः श्रीनारायणराम महोदयः। अस्मात् ग्रन्थात् केचन श्लोकाः अत्र प्रदत्ताः विद्यन्ते ।




विद्याप्रशंसा -

नास्ति विद्यासमो बन्धुः
नास्ति विद्यासमः सुहृत् ।
नास्ति विद्यासमं वित्तं
नास्ति विद्यासमं सुखम् ।। 1

मौनम् -

आत्मनः मुखदोषेण
बध्यन्ते शुकसारिकाः ।
बकास्तु नैव बध्यन्ते
मौनं सर्वार्थसाधनम् ।। 2



Unit 5.indd 26 18-03-2019 13:36:16

सत्यप्रशंसा -

सत्यान्नास्ति परो धर्मः
सत्यान्नास्ति परं तपः ।
सत्यान्नास्ति परो योगः
सत्यान्नास्ति परं पदम् ।। 3

धीराः -

वनेऽपि सिंहाः गजमांसभक्षिणः
बुभुक्षिता नैव तृणं चरन्ति ।
एवं कुलीना व्यसनाभिभूताः
न नीचकर्माणि समाश्रयन्ति ।। 4

मित्रलक्षणम् -

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः 5

सुपुत्रः-

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं स्यात् वनं सर्वं सुपुत्रेण कुलं यथा ।। 6

उद्यमः-

उद्यमेनैव कार्याणि सिद्ध्यन्ति न मनोरथैः ।
न हि सुप्तस्य सिंहस्य विशन्ति वदने मृगाः ।। 7

## अभ्यासः

I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. बन्धुः - relative
2. सुहृद् - friend
3. वित्तम् - wealth
4. शुकः - parrot



Unit 5.indd 27 18-03-2019 13:36:16

| | | | |
|---|---|---|---|
| 5. | बकः | - | crane |
| 6. | मौनम् | - | silence |
| 7. | तपः | - | penace |
| 8. | सिंहः | - | lion |
| 9. | वनम् | - | forest |
| 10. | तृणम् | - | grass |
| 11. | कुलीनः | - | of a good family |
| 12. | गुह्यम् | - | keep secret |
| 13. | मित्रम् | - | friend |
| 14. | मृगाः | - | animals |

II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

| | | | |
|---|---|---|---|
| 1. | सुहृद् | × | शत्रुः |
| 2. | अस्ति | × | नास्ति |
| 3. | दोषः | × | गुणः |
| 4. | अर्थः | × | अनर्थः |
| 5. | परः | × | अपरः |
| 6. | गुह्यम् | × | व्यक्तम् |
| 7. | एकम् | × | अनेकम् |
| 8. | सुवृक्षः | × | कुवृक्षः |
| 9. | सुगन्धः | × | दुर्गन्धः |
| 10. | उद्यमः | × | अलसः |

III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत –

| | | | |
|---|---|---|---|
| 1. | सर्वार्थ | - | सर्व + अर्थ |
| 2. | बकास्तु | - | बकाः + तु |
| 3. | वनेऽपि | - | वने + अपि |
| 4. | नैव | - | न + एव |
| 5. | पापान्निवारयति | - | पापात् + निवारयति |
| 6. | एकेनापि | - | एकेन + अपि |

7. उद्यमेनैव - उद्यमेन + एव

8. सन्मित्रम् - सत् + मित्रम्

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. कस्याः समः सुहृत् नास्ति ?
2. मुखदोषेण के बध्यन्ते ?
3. किं सर्वार्थसाधनं भवति ?
4. कस्मान्नास्ति परो धर्मः?
5. के बुभुक्षिताः अपि तृणं न चरन्ति?
6. के नीचकर्माणि न समाश्रयन्ति?
7. केन कुलस्य प्रशस्तिः भवति?
8. केन कार्याणि सिद्ध्यन्ति?

## V. सविस्तरम् उत्तरं लिखत-

1. संस्कृतसुभाषितानि इति पाठात् पञ्च श्लोकान् व्याख्यात ।
2. सुभाषितरत्नभण्डाकारात् उद्धृतेभ्यः सुभाषितेभ्यः श्लोकपञ्चकं विवृणुत ।

x------------------------x------------------------x

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

### सुभाषितप्रशस्तिः

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्माद्धि काव्यं मधुरं तस्मादपि सुभाषितम् ।।
द्राक्षा म्लानमुखी जाता, शर्करा चाश्मता गता ।
सुभाषितरसस्याग्रे सुधा भीता दिवं गता ।।
पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषणखण्डेषु रत्नसंज्ञा विधीयते ।।
धर्मो यशो नये दाक्ष्यं मनोहारि सुभाषितम् ।
इत्यादि गुणरत्नानां संग्रहो नावसीदते ।।



Unit 5.indd 29 18-03-2019 13:36:16

सुभाषितेन गीतेन युवतीनां च लीलया ।
मनो न भिद्यते यस्य स योगी ह्यथवा पशुः ।।
रसनायाश्च पक्कान्नं, श्रोत्रयोश्च सुभाषितम् ।
सरसानां कृते नित्यं, परमाह्लादकारकम् ।।
संसारकटुवृक्षस्य द्वे फले ह्यमृतोपमे ।
सुभाषितरसास्वादः सज्जनानां च सङ्गतिः ।।

## पाठ्यातिरिक्तः व्याकरणविषयः

### उपसर्गः

| उपसर्गः | धातुः | उत्तरम् | उपसर्गः | मूलशब्दः | उत्तरम् |
|---|---|---|---|---|---|
| अधि | गम् | अधिगच्छति | पर | उपकारः | परोपकारः |
| अनु | गम् | अनुगच्छति | प्र | आचार्यः | प्राचार्यः |
| उत् | भू | उद्भवति | कु | पुत्रः | कुपुत्रः |
| प्र | नम् | प्रणमते | सु | उक्तिः | सूक्तिः |
| आ | गम् | आगच्छति | दुर् | भावना | दुर्भावना |
| अनु | कृ | अनुकरोति | प्रति | दिनम् | प्रतिदिनम् |
| परि | त्यज् | परित्यजति | स | परिवारम् | सपरिवारम् |
| अनु | भू | अनुभवति | दुर् | जनः | दुर्जनः |
| प्र | विश् | प्रविशति | सम् | तुष् | सन्तुष्टः |
| उत् | स्था | उत्तिष्ठति | अति | अधिकः | अत्यधिकः |
| उप | कृ | उपकरोति | दुर् | आचारः | दुराचारः |
| उप | विश् | उपविशति | सु | आगतम् | स्वागतम् |
| आ | नी | आनयति | उप | वनम् | उपवनम् |
| प्र | सृ | प्रसरति | निर् | जनः | निर्जनः |
| अनु | सृ | अनुसरति | निर् | बलः | निर्बलः |
| वि | नश् | विनश्यति | अति | आचारः | अत्याचारः |



Unit 5.indd 30 18-03-2019 13:36:16

# प्रत्ययाः

प्रत्ययाः

| कृत्-प्रत्ययाः | तद्धितप्रत्ययाः | स्त्रीप्रत्ययाः |
|---|---|---|

## 1. कृत् – प्रत्ययाः

| | | |
|---|---|---|
| तुमुन् | - | पठ् + तुमुन् = पठितुम् |
| क्त्वा | - | पठ् + क्त्वा = पठित्वा |
| ल्यप् | - | वि + हस् + ल्यप् = विहस्य |
| क्त | - | खाद् + क्त = खादितः |
| क्तवतु | - | कुप् + क्तवतु = कुपितवान् / कुपितवत् |
| तव्यत् | - | चल् + तव्यत् = चलितव्यः |
| अनीयर् | - | कुप् + अनीयर् = कोपनीयः |
| शतृ | - | गम् + शतृ = गच्छन् / गच्छत् |
| शानच् | - | याच् + शानच् = याचमानः |

## 2. तद्धितप्रत्ययाः

मतुप् – बुद्धि + मतुप् = बुद्धिमान् / बुद्धिमती / बुद्धिमत्

णिनि – योग + णिनि – योगिन् – योगी / योगिनी / योगी

ठक् – धर्म + ठक् – धार्मिक – धार्मिकः / धार्मिका / धार्मिकम्

त्व – 1. धर्म + त्व – धर्मत्वम् 2. चारु + त्व - चारुत्वम्

तल् – 1. कटु + तल् – कटुता 2. गुरु + तल् – गुरुता

## 3. स्त्रीप्रत्ययाः

टाप् – दक्ष + टाप् = दक्षा

सरल + टाप् = सरला

ङीप् - कर्तृ + ङीप् = कर्त्री

गोप + ङीप् = गोपी

नट + ङीप् = नटी



Unit 5.indd 31 18-03-2019 13:36:16

षष्ठः पाठः

Lesson – 6

# दयापरः दधीचिः

# 6

अस्मद् भारतम् ऋषीणां देशः । प्राचीनकाले अत्र बहवः ऋषयः मुनयः च आसन् । केचित् मुनयः पर्वतानां गुहासु निवसन्तः, तपश्चर्याम् अकुर्वन् । मौनी, संयमी, तत्वदर्शी च मुनिः भवति । परोपकारः परमः धर्मः इति मुनीनां मतम् । परोपकाराय ते भूमिम् आगच्छन्ति, जनेभ्यः च सन्मार्गं दर्शयन्ति । अतः परोपकारस्य प्रामुख्यं बोधयितुम् अत्र एका कथा उपस्थाप्यते ।

परेषाम् उपकारः परोपकारः इत्यभिधीयते । समाजे मानवः परस्य हितसाधनार्थं यत् किञ्चित् वितरति, मनसा वाचा कर्मणा वा परार्थं सम्पादयति, परेषां हितं वा अनुतिष्ठति, तत् सर्वं परोपकारः इति गण्यते ।

परोपकाराय फलन्ति वृक्षाः, परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः, परोपकारार्थम् इदं शरीरम् ।।

अस्य 'परोपकारार्थमिदं शरीरम्' इति वाक्यस्य आदर्शत्वेन बहवः पुरुषाः आसन् । तेषु एते प्रसिद्धाः –

कर्णस्त्वचं शिबिर्मांसं जीवं जीमूतवाहनः ।
ददौ दधीचिरस्थीनि नास्त्यदेयं महात्मनाम् ।। इति ।

इतः दधीचिमुनेः कथा वर्ण्यते ।





Unit 6.indd 32 18-03-2019 13:37:14

पुरा कालेया नाम राक्षसाः, वृत्रं समाश्रित्य इन्द्रलोकं पीडयामासुः । तान् हन्तुम् अशक्नुवन्तः शक्रादयो देवाः ब्रह्माणम् उपगम्य स्वदानवभयं निवेदयामासुः । ब्रह्मा अब्रवीत् - "वत्साः मा बिभीत। दधीचम् ऋषिं गत्वा तस्य अस्थीनी गृह्णीत । तैश्च वज्रं कृत्वा तेन वृत्रं हत" इति ।

तद्वचनम् अनुसृत्य देवाः दधीचि - महर्षेः आश्रमं गत्वा नत्वा च तं, तदीयानि अस्थीनि अयाचन्त। सद्य एव स महात्मा लोकहिताय आत्मनः प्राणान् उत्ससर्ज । देवाः तस्य अस्थीनि आदाय वज्रं कारयामासुः ।

तदनन्तरं शक्रपुरागमानां देवानां राक्षसानां च मध्ये युद्धं प्रावर्तत । रजोभिः सर्वाः ककुभः व्याप्यन्त । सर्वे लोकाः अकम्पन्त । तदा विष्णुतेजसाविष्टः जिष्णुः एकाकी रणे वृत्रस्य शिरसि वज्रम् अपातयत् । वृत्रः भग्नशिरः क्षितौ अपतत् । देवाः सन्तुष्टाः अभवन् । "इन्द्रो वृत्रहा" इति प्रथा प्राप्नोति स्म । अत एव उक्तं-

"दया विहीनसंपदः स्वमात्रकार्यसाधकाः
दयावदङ्गमप्यहो परोपकारकल्पकम्" ।। इति ।

## अभ्यासः

### I. कठिनशब्दार्थः-

1. राक्षसः - demon
2. शक्रः - Lord Indra
3. ऋषिः - sage
4. अस्थीनि - bones
5. आश्रमम् - hermitage
6. युद्धम् - war
7. रजः - dust
8. ककुभः - sky
9. जिष्णुः - Lord Indra
10. क्षितौ - in the earth
11. प्रथा - fame

### II. योजयत-

1. राक्षसः - स्वमात्रकार्यसाधकः
2. शक्रः - वज्रायुधम्
3. दधीचिः - वृत्रः
4. अस्थीनी - जिष्णुः
5. दयाविहीनः - ऋषिः



Unit 6.indd 33 18-03-2019 13:37:14

## III. कोष्ठात् उचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत -

1. __________ ककुभः व्याप्यन्त (रजोभिः / वाग्भिः)
2. देवाः __________ अयाचन्त । (अस्थीनि / अस्त्राणि)
3. कालेया नाम राक्षसाः __________ समाश्रित्य देवान् पीडयामासुः (वृत्रम् / रावणम्)
4. देवाः __________ उपजग्मुः । (ब्रह्माणम् / शिवम् )
5. देवाः अस्थीनि आदाय __________ कारयामासुः । (वज्रम् / वक्त्रम् )

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. राक्षसाः कं पीडयामासुः ?
2. कः वृत्रहा इति प्रथा प्राप्नोति स्म ?
3. देवानां राक्षसानां मध्ये किं प्रावर्तत ?
4. देवाः कस्य आश्रमम् अगच्छन् ?
5. इन्द्रः वृत्रस्य शिरः केन अपातयत् ?

## V. सविस्तरम् उत्तरं लिखत-

1. यथाग्रन्थं दधीची - महर्षेः दयां वर्णयत ।
2. इन्द्रः कथं वृत्रं हतवान् इति यथाग्रन्थं लिखत।

x------------------------x------------------------x

### पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

भारते ऋषयः ज्ञान-विज्ञानसंयुताः आसन् । मुनीनां आश्रमाः सुरम्येषु प्रदेशेषु भवन्ति स्म । प्रशान्ते मनोहरे च प्राकृतिके वातावरणे योगः, ध्यानम्, तपश्चर्या इति एतत् सर्वं तेषां सुलभम् आसीत् ।

**परोपकारस्य महत्वम् -**

परोपकारः कर्तव्यः प्राणैरपि धनैरपि ।<br>
परोपकारजं पुण्यं न स्यात् क्रतुशतैरपि ।।

अष्टादश पुराणकर्तुः व्यासस्य उपदेशग्रन्थेषु द्वयमेव तस्याभिहितम् –

अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।<br>
परोपकारः पुण्याय पापाय परपीडनम् ।।



Unit 6.indd 34 18-03-2019 13:37:14

उक्तं च –

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।

विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन ।।

ऋषयः जन्मावधि परोपकारेण स्वजीवनं सफलयन्तः अवलोक्यन्ते । प्रकृतौ सूर्यचन्द्रमेधादीनामपि परोपकारस्वभावः प्रशस्यते।

उक्तं च -

पद्माकरं दिनकरो विकचं करोति

चन्द्रो विकासयति कैरवचक्रवालम् ।

नाभ्यर्थितो जलधरोऽपि जलं ददाति

सन्तः स्वयं परहिते विहिताभियोगाः ।।

परोपकारभावनया महर्षिः दधीचिः देवानां हिताय यथा स्वीयम् अस्थिजातं प्रादात्, तथैव दयालुः जीमूतवाहनः अपि नागरक्षणार्थं स्वजीवनम् अत्यजत् ।

जीमूतवाहनस्य प्राणत्यागः एवम् अभवत् –

एकस्मिन् अरण्ये जीमूतवाहनः स्वपत्न्या सह वसति स्म । जीमूतवाहनः प्रतिदिनं स्वमित्रेण सह पर्वतारोहणं कुर्वन् आसीत् । कस्मिंश्चित् स्थले सः सर्पाणाम् अस्थिराशयः अपश्यत् । जीमूतवाहनः स्वमित्रं प्रति एतस्य कारणम् अपृच्छत् । सः अवदत् – कदाचित् गरुडः स्वविमातुः पुत्रैः सर्पैः वञ्चितः । तदाप्रभृति तयोः विरोधः सञ्जातः । गरुडभीत्या सर्वे सर्पाः पाताले प्रतिवसन्नपि, गरुडः तान् अन्विष्य, तान् घ्नन्ति अश्नन्ति च । एतत् दृष्ट्वा सर्पराजा वासुकिः गरुडम् अप्रार्थयत् – 'प्रत्येकम् एकमेव सर्पं त्वया स्वीकर्तव्यम्' इति । तदनुसारेण गरुडः अपि प्रतिदिनं एकैकं सर्पम् अश्नाति स्म । एवं गरुडेन खादित - सर्पाणाम् अस्थिराशयः एव एते इत्यवदत्।

तेन जीमूतवाहनः दुःखितः अभूत् । कदाचित् 'शङ्खचूडः' नाम सर्पस्य समयः आगतः । सर्पगमनात् पूर्वमेव जीमूतवाहनः गरुडसमीपे भक्षार्थं गतवान् । (प्राणत्यागं कृतवान्) गरुडः तं स्वपादैः आनाय्य खादितुम् आरभत । तत् समये शङ्खचूडः अत्र आगतः । शङ्खचूडः गरुडमुद्दिश्य 'अयं सर्पः न' इत्यवदत् ।

एतत् ज्ञात्वा गरुडः स्वापराधक्षमार्थं वरं दत्तवान्। जीमूतवाहनः 'इतः परं सर्पाणां भक्षणं न कर्तव्यम्' । अपि च, ये सर्पाः त्वया मृताः भवन्ति, तान् पुनर्जीवयतु इति अयाचत । तेन वरेण सन्तुष्टः गरुडः मृतसर्पाणां पुनः जीवनम् अदात् । एवं जीमूतवाहनः स्वप्राणं त्यक्त्वा सर्पाणां जीवनम् अरक्षत् ।



Unit 6.indd 35 18-03-2019 13:37:14

## व्याकरण-अभ्यासः - 3

### चकारान्तः स्त्रीलिङ्गः"वाच्"शब्दः (Thee)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वाक् | वाचौ | वाचः |
| द्वितीया | वाचम् | वाचौ | वाचः |
| तृतीया | वाचा | वाग्भ्यां | वाग्भिः |
| चतुर्थी | वाचे | वाग्भ्यां | वाग्भ्यः |
| पञ्चमी | वाचः | वाग्भ्यां | वाग्भ्यः |
| षष्ठी | वाचः | वाचोः | वाचाम् |
| सप्तमी | वाचि | वाचोः | वाक्षु |
| सं.प्र | हे वाक् | हे वाचौ | हे वाचः |

### द्विशब्दः - नित्यद्विवचनान्तः (two)

| विभक्तिः | पुंलिगः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| प्रथमा | द्वौ | द्वे | द्वे |
| द्वितीया | द्वौ | द्वे | द्वे |
| तृतीया | द्वाभ्यां | द्वाभ्यां | द्वाभ्यां |
| चतुर्थी | द्वाभ्यां | द्वाभ्यां | द्वाभ्यां |
| पञ्चमी | द्वाभ्यां | द्वाभ्यां | द्वाभ्यां |
| षष्ठी | द्वयोः | द्वयोः | द्वयोः |
| सप्तमी | द्वयोः | द्वयोः | द्वयोः |



Unit 6.indd 36 18-03-2019 13:37:14

## अनुच्छेदलेखनम् – 2

### (Comprehension – 2)

शाकानां फलानां भक्षणेन शरीरस्य आरोग्यं बलं च अभिवर्धते । कारवेल्लस्य रसः कषायः भवति। भिण्डीनकस्य भक्षणेन बुद्धिः वर्धते । आमलकम् आरोक्यप्रदं भवति । बीजापूरकं शीघ्रं न जीर्यते । जम्बीरफलम् औष्ण्यं पित्तं च शमयति।।

प्रश्नाः-

1. केषां भक्षणेन शरीरस्य बलं वर्धते ?
2. किं फलं शीघ्रं न जीर्यते ?
3. कारवेल्लस्य रसः कीदृशः ?
4. केन भक्षणेन बुद्धिः वर्धते ?
5. किं फलम् औष्ण्यं पित्तं च शमयति ?



## अनुवादः – 2



पुरा चन्द्रवंशे नहुषः नाम नरपतिः आसीत्। सः महता विभवेन शतम् अश्वमेधान् आहृत्य द्वितीयः शतक्रतुः इव व्यराजत। अत्रान्तरे इन्द्रः वृत्रं हत्वा पापम् अवाप्य अन्तर्जले न्यलीयत। तस्मिन् समये अयं नहुषः इन्द्रपदवीम् अधिरोपितः । समनन्तरमेव सः मदान्धः अभवत्। अथ सः इन्द्राणीम् द्रष्टुम् इच्छन् सप्तर्षीन् आहूय स्वशिबिकावहनाय आदिदेश । राजा च तान् पदे पदे परुषवचनैः अनिन्दत् । इतरैः सह गन्तुम् अशक्तम् अगत्स्यं "कुम्भडिम्भ, सर्प सर्प" इत्यधिक्षेप । आत्मानम् अधिक्षिप्तं पश्यन् अगत्स्यः नहुषं "सर्पो भव" इति अशपत् । शप्तमात्रैव नहुषः सर्पो भूत्वा शिबिकातः क्षितौ पपात।।



Unit 6.indd 37 18-03-2019 13:37:14

सप्तमः पाठः

Lesson – 7

# वृक्षविज्ञानम्

# 7

लोके अस्मिन् वृक्षाः वर्षाधाराः भवन्ति । सर्वेषां जनानाम् आहारप्रदाने तरवः एव प्रथमं स्थानं वहन्ति । वृक्षाः परोपकारार्थमेव फलन्ति । वृक्षाणां सर्वे भागाः यथा शाखाः पत्राणि पुष्पाणि फलानि इत्यादयः जीवने बहूपकारं कुर्वन्ति । वृक्षाणामपि मनुष्याणाम् इव पञ्चकर्मेन्द्रियाणि सन्ति । अयं पाठ्यभागः महर्षि - व्यासप्रणीत - महाभारतात् स्वीकृतः । अत्र वृक्षाणां पञ्चकर्मेन्द्रियशक्तिः वर्ण्यते ।



## वृक्षाणां वीक्षणशक्तिः (नेत्रम्)

वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति ।
न ह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः ।। 1

## वृक्षाणां श्रवणशक्तिः (श्रोत्रम्)

वाय्वग्न्यशनि निष्पेषैः फलपुष्पं विशीर्यते ।
श्रोत्रेण गृह्यते शब्दः तस्माच्छृण्वन्ति पादपाः ।। 2



Unit 7.indd 38 22-03-2019 15:37:24

वृक्षाणां घ्राणशक्तिः (नासिका)

पुण्यपापैः तथा गन्धैः
धूपैश्च विविधैरपि ।
अरोगाः पुष्पिताः सन्ति
तस्मात् जिघ्रन्ति पादपाः ।। 3

वृक्षाणां रसनशक्तिः (जिह्वा)

पादैः सलिलपानं च व्याधीनामपि दर्शनम् ।
व्याधिप्रतिक्रियात्वाच्च विद्यते रसने द्रुमे ।। 4

वृक्षाणां स्पर्शनशक्तिः (त्वक्)

ऊष्मतः म्लानपर्णानां त्वक्फलं पुष्पमेव च ।
म्लायते चैव शीतेन स्पर्शः तेनात्र विद्यते ।। 5

तस्मात् वृक्षच्छेदनं न कुर्यात् । अपि च लोकहिताय वृक्षवर्धनम् आवश्यकम् ।।

महाभारतस्य प्रणेता महर्षिः वेदव्यासः । अयं भगवतः विष्णोः अंशः इति वदन्ति ।अयम् अष्टादश पुराणानां कर्ता । अस्य पिता महर्षिः पराशरः । माता सत्यवती । अस्य कृष्णद्वैपायनः इति नाम । वेदराशिपरिष्करणेन अयं वेदव्यासः इति नाम्ना विश्रुतः ।

## अभ्यासः

I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

| | | | |
|---|---|---|---|
| 1. | घनाः | - | clouds |
| 2. | वृक्षाः | - | trees |
| 3. | संशयः | - | doubt |
| 4. | वल्ली | - | creaper |
| 5. | श्रोत्रम् | - | ear |
| 6. | नेत्रम् | - | eye |
| 7. | जिह्वा | - | tongue |
| 8. | सलिलम् | - | water |
| 9. | त्वक् | - | skin |
| 10. | पर्णः | - | leaf |



Unit 7.indd 39 22-03-2019 15:37:24

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

| | | | |
|---|---|---|---|
| 1. | नित्यम् | × | अनित्यम् |
| 2. | आवश्यकम् | × | अनावश्यकम् |
| 3. | व्यक्तिः | × | समूहः |
| 4. | पुण्यम् | × | पापम् |
| 5. | रोगः | × | अरोगः |
| 6. | शीतम् | × | उष्णम् |

## III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत –

| | | | |
|---|---|---|---|
| 1. | कर्मेन्द्रियाणि | - | कर्म + इन्द्रियाणि |
| 2. | आकाशोऽस्ति | - | आकाशः + अस्ति |
| 3. | व्यक्तिर्नित्यम् | - | व्यक्तिः + नित्यम् |
| 4. | सर्वतश्च | - | सर्वतः + च |
| 5. | वाय्वग्नि | - | वायु + अग्नि |
| 6. | धूपैश्च | - | धूपैः + च |
| 7. | तेनात्र | - | तेन + अत्र |
| 8. | मार्गोऽस्ति | - | मार्गः + अस्ति |

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. वृक्षविज्ञानम् इत्यस्य पाठस्य मूलग्रन्थः कः ?
2. केन शब्दः गृह्यते ?
3. वृक्षाः कैः सलिलपानं कुर्वन्ति ?
4. लोकहिताय किम् आवश्यकम् ?
5. लोकहिताय किं न कुर्यात् ?

## V. सविस्तरम् उत्तरं लिखत-

1. वृक्षाणां पञ्चकर्मेन्द्रियेषु त्रीणि विशदयत ।
2. वृक्षविज्ञानम् इति पाठात् श्लोकत्रयं व्याख्यात ।

x-------------------------x-------------------------x

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

रामायणमहाभारतौ इतिहासौ भवतः । महाभारतमुद्दिश्य वह्व्यः सूक्तयः सन्ति । तद्यथा -

1. यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।
2. महाभारतं वा पठनीयं महाराज्यं वा पालनीयम् ।
3. भारतं पञ्चमो वेदः, इत्याद्यः।

महाभारतस्य जयमिति नामान्तरम् । अयं ग्रन्थः धर्मनिरूपणपरः। यतो धर्मः ततः जयः इति । महाभारतकथायाः औन्नत्यं मानातीतम् । "भारतं पञ्चमो वेदः" इत्यनेन महाभारतस्य वेदसाम्यं सिद्ध्यति । मनुष्येन संपादयितव्याः चत्वारः पुरुषार्थाः महाभारतादेव लभ्यन्ते इति कृत्वा महाभारतं पञ्चमो वेदः इति आख्यायते।

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ।।

व्यासम् अधिकृत्य भगवत्पादाः एवं स्मरन्ति-

वेदाः षडङ्गं निखिलञ्च शास्त्रं
महान् महाभारतवारिराशिः ।
त्वत्तः पुराणानि च सम्बभूवुः
सर्वं त्वदीयं खलु वाङ्मयाख्यम् ।।

इयं भूमिः प्रकृतिम् आश्रित्यैव सञ्चरति । जनानां जीवनं प्रकृतेः अङ्के एव वर्तते। वृक्षाः प्रकृतिसञ्चालने मुख्याः वर्तन्ते । भूमौ सहस्रशः वृक्षाः लताः च विद्यन्ते। विद्वांसः तेषां भेदः अत्यद्भुतरीत्या विशदीकुर्वन्ति ।

### पादपभेदाः

वनस्पति द्रुमलता गुल्माः पादपजातयः।
बीजात् काण्डात् तथा कन्दात् तज्जन्म त्रिविधं विदुः ।।

पादपाः चतुर्विधाः भवन्ति ते वनस्पतिः द्रुमाः, लता गुल्माः इति । ते वृक्षाः बीजात् (seed) शाखात्(branches) तथा मूलात् (roots) इति त्रिप्रकारेण विस्तृताः भवन्ति ।

ते वनस्पतयः प्रोक्ता विना पुष्पैः फलन्ति ये ।
द्रुमाश्चान्ये निगदिताः पुष्पैः सह फलन्ति ये ।।

ये विना पुष्पं फलन्ति ते वनस्पतयः (औषधयः) ये पुष्पैः सह फलन्ति ते द्रुमाः ।



Unit 7.indd 41 22-03-2019 15:37:24

## पाठ्यातिरिक्तः व्याकरणविषयः

### विशेषण – विशेष्यसूचकानि पदानि

| पुंलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| चतुरः | बालकः |
| हरितः | वृक्षः |
| कुरूपः | दानवः |
| कुशलः | जनः |
| धनवान् | मनुष्यः |
| प्रसन्नः | पुत्रः |
| स्वस्थः | शिशुः |
| कृष्णः | मेघः |

| स्त्रीलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| सुन्दरी | नारी |
| चपला | बालिका |
| निर्धना | महिला |
| विशाला | शाला |
| कृष्णा | धेनुः |
| पुष्पिता | लता |
| स्वस्थाः | बालिकाः |
| दुर्बला | वृद्धा |

| नपुंसकलिङ्गम् | |
|---|---|
| विशेषणम् | विशेष्यम् |
| श्वेतं | कमलम् |
| सुन्दरं | पुस्तकम् |
| शीतलं | जलम् |
| विकसितं | पुष्पम् |
| मलिनं | वस्त्रम् |
| कृष्णं | धनम् |
| सुन्दराणि | चित्राणि |
| नीलं | गगनम् |

### कारकपरिचयः

| विभक्तिः | कारकम् | वाक्यम् |
|---|---|---|
| प्रथमा | कर्ता | छात्रः लिखति। |
| द्वितीया | कर्म | सः पत्रं लिखति। |



Unit 7.indd 42 22-03-2019 15:37:24

| | | |
|---|---|---|
| तृतीया | करणम् | सः कलमेन लिखति। |
| चतुर्थी | सम्प्रदानम् | अहं गुरवे पुष्पाणि आनयामि। |
| पञ्चमी | अपादानम् | वृक्षात् पत्राणि पतन्ति। |
| षष्ठी | सम्बन्धः | रामः दशरथस्य सुतः। |
| सप्तमी | अधिकरणम् | वृक्षे वानराः सन्ति। |
| संबोधन- प्रथमा | संबोधनम् | हे राम! अत्र आगच्छ। |

### कर्तृकारकम्

1. वानरः खादति।
2. सः पठति।
3. तौ धावतः।
4. महिलाः गच्छन्ति।
5. सैनिकः रक्षति।

### कर्मकारकम्

1. बालकः शुकं पश्यति।
2. नरः भोजनं खादति।
3. महिला लतां सिञ्चति।
4. रामः फलं खादति।
5. माता भोजनं पचति।

### करणकारकम्

1. वृद्धः दण्डेन चलति।
2. बालकः कन्दुकेन क्रीडति।
3. गजाः पादैः चलन्ति।
4. जनाः मुखेन खादन्ति।
5. नृपः हस्ताभ्यां ददाति।

### सम्प्रदानकारकम्

1. सा छात्राय पुस्तकं ददाति।
2. सः पठनाय विद्यालयं गच्छति।
3. नृपः याचकाय धनं यच्छति।
4. माता पुत्राय दुग्धं ददाति।
5. अध्यापकः छात्रेभ्यः ज्ञानं प्रयच्छति।



Unit 7.indd 43 22-03-2019 15:37:24

### अपादानकारकम्

1. वृक्षात् पत्राणि पतन्ति ।
2. लतायाः पुष्पाणि पतन्ति ।
3. हिमालयात् गङ्गा प्रवहति ।
4. पथिकः गृहात् आगच्छति ।
5. वानराः भवनात् अवतरन्ति ।

### सम्बन्धे षष्ठी

1. कूपस्य जलं मधुरम् अस्ति ।
2. इदं पुस्तकं रामस्य अस्ति ।
3. पिकस्य स्वरः मधुरः भवति ।

### अधिकरणकारकम्

1. पादपे फलानि सन्ति ।
2. पुष्पेषु भ्रमराः सन्ति ।
3. सः कटे उपविशति ।
4. वने सिंहः अस्ति ।
5. गृहेषु जनाः सन्ति ।

### संबोधनकारकम्

1. हे देव ! रक्षां कुरु
2. हे राम ! अत्र आगच्छ ।
3. हे मेघ ! जलं देहि ।



Unit 7.indd 44 22-03-2019 15:37:24

अष्टमः पाठः

Lesson – 8

# योगासनानि

# 8

योगविद्या भारतवर्षस्य अमूल्यनिधिः । "युज्यते इति योगः" । योगात् चित्तशुद्धिः भवति । पुरातनकालात् आरभ्य योगशास्त्रेण भारतीयाः उत्तमम् आरोग्यं प्राप्य सुखेन जीवन्ति । इदानीं न केवलं भारतीयाः जनाः, परन्तु सर्वे जनाः योगशास्त्रस्य उत्तमं प्रयोजनं प्राप्नुवन्ति । महर्षेः पतञ्जलेः योगसूत्राणि जगत्प्रसिद्धानि । अस्मिन् पाठे कतिपयानि दैनन्दिनयोगासनानि तेषां लक्षणप्रयोजनानि च उल्लिखितानि भवन्ति ।

## सूर्यनमस्कारः



आसनकरणात् पूर्वं सूर्यनमस्कारः अवश्यं करणीयः। अनेन शरीरस्य नम्यत्वं सिद्ध्यति। सूर्यनमस्कारः इत्यनेन सूर्याय साष्टाङ्गप्रणामार्पणम् इत्यर्थः । अनेन इन्द्रियाणि बलप्रदानि भवन्ति। आसन – प्राणायाम - व्यायामादीनां प्रयोजनं सूर्यनमस्कारादेव लभ्यते । अनेन शरीरस्य उत्साहःभवति ।

## पद्मासनम्



पद्मासनं सर्वरोगाणाम् अन्तकः भवन्ति। इदं पृष्ठास्थीन् प्रेरयित्वा रक्ताभिवृद्ध्यर्थं सहकरोति । इदम् आसनं बहुवारं कृतं चेदपि न कोऽपि दोषः । अस्मिन् आसने शरीरस्य व्यवस्थितिः पद्मवत् भवति इत्यस्मात् अस्य पद्मासनम् इति नाम कृतम् ।

## वज्रासनम्



भोजनानन्तरमपि इदम् आसनं कर्तुं शक्यते । निरन्तर-अभ्यासेन श्वासः तथा नाडीसमूहः च स्वस्थः भवति । अनेन जीर्णशक्तिः वर्धते । इदं वज्रनाडिं प्रेरयित्वा, शरीर - अस्थीनां तथा नाडीनां बलं ददाति । शरीरं वज्रवत् भवेत् इत्यस्मात् कारणात् अस्यासनस्य वज्रासनम् इति नाम भवति।

## मकरासनम्



इदम् आसनं पञ्चवर्षीय बाल-बालकाभिः अवश्यं करणीयम् । तिलकयोः (lungs) तथा पृष्ट भागस्य बलं वर्धयति । इदम् आसनं शरीरस्य चित्तविकारं दूरीकरोति। नाडीनां विश्रामः ददाति । हृदयसंबन्धरोगं तथा चित्तविक्षेपं च निवारयति । अस्याम् अवस्थायां शरीरं मकरवत् भवति इत्यस्मात् इदं मकरासनम् इति अभिधीयते ।



## त्रिकोणासनम्

इदम् आसनं तिष्ठन्नवस्थायां कर्तव्यं भवति । इदं बाहुस्नायूनां बलं ददाति । पृष्ठास्थीनां नम्यत्वं ददाति । शरीरे विद्यमानस्य अपरिमित मेधसः क्षयः भवति । शरीरस्य स्नायूनाम् आरोग्यं ददाति । इदं त्रिकोणेषु भवति इत्यस्मात् त्रिकोणासनम् इति नाम्ना व्यपदिश्यते ।

पतञ्जलिमहर्षिः योगशास्त्रस्य जनकः । पतञ्जलिः भगवतः विष्णोः पर्यङ्करूप-आदिशेषस्य अवतारः । एकदा महाविष्णुः परमेश्वरस्य आनन्दताण्डवं पश्यन् आसीत् । तदा तस्य शरीरस्य भारः अधिकः जातः । तस्य भारं वोढुम् अशक्नुवन् आदिशेषः तस्य कारणं किमिति भगवन्तम् अपृच्छत् । तदा विष्णुः शिवस्य आनन्दताण्डवानुभवेन मम शरीरे शक्तिः अधिका जाता इत्यवदत् । योगानां दर्शनमात्रेण ईदृशानि सुफलानि संभवन्ति चेत् तदनुष्ठितस्य शक्तिः वाचा वर्णयितुम् अशक्या इति मत्वा योगासनानि लोके प्रचारयितुं सः आदिशेषः भूमौ पतञ्जलिरूपेण अजायत । अयं महापुरुषः 196 योगसूत्राणि अरचयत् ।

## अभ्यासः

### I. कठिनशब्दार्थः-

| | | | |
|---|---|---|---|
| 1. | आधुनिककाले | - | in modern times |
| 2. | जन्म | - | birth |
| 3. | सिद्धान्तः | - | conclusion |
| 4. | प्रतिदिनम् | - | daily |
| 5. | अभ्यासः | - | practise |
| 6. | रोगः | - | disease |
| 7. | नम्यत्वम् | - | flexible |
| 8. | इन्द्रियाणि | - | organs |



Unit 8.indd 46 18-03-2019 13:39:29

9. व्यायामः - exercise
10. उत्साहः - enthusiasm
11. अन्तकः - destroyer
12. अभिवृद्धिः - Increase
13. व्यवस्थितिः - pose
14. पृष्ठास्थी - back bone
15. स्वस्थः - healthy
16. जीर्णशक्तिः - digestion
17. बलम् - strength
18. तिलकम् - lung
19. विश्रामः - rest
20. स्नायुः - muscles
21. मेधसः - of fat

## II. योजयत-

1. योगाचार्यः - मेधसः क्षयः
2. सूर्यनमस्कारः - जीर्णशक्तिवर्धनम्
3. पद्मासनम् - साष्टाङ्गप्रणामार्पणम्
4. वज्रासनम् - सर्वरोगाणाम् अन्तकः
5. त्रिकोणासनम् - पतञ्जलिमहर्षिः

## III. कोष्ठकात् उचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. प्रतिदिनम् __________ कर्तव्यः (अभ्यासः / अनभ्यासः)
2. शरीरस्य नम्यत्वं __________ सिद्ध्यति। (सूर्यनमस्कारेण / विहारेण)
3. पद्मासने शरीरस्य व्यवस्थितिः __________ भवति। (पद्मवत् / पत्रवत्)
4. वज्रासनं __________ कर्तव्यम्। (भोजनसमये / भोजनानन्तरसमयेऽपि)
5. मकरासनं __________ करणीयम्। (बालैः / वृद्धैः)

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. योगाचार्यः कः ?
2. योगासनानि कदा कर्तव्यानि ?



Unit 8.indd 47 18-03-2019 13:39:29

3. सूर्यनमस्कारेण कानि बलप्रदानि भवन्ति ?

4. वज्रासनेन श्वासः कथं भवति ?

5. मकरासनेन कयोः बलं वर्धयति ?

6. रक्ताभिवृद्ध्यर्थं किं सहकरोति ?

7. त्रिकोणासनेन कस्य क्षयः भवति ?

## V. सविस्तरम् उत्तरं लिखत-

1. त्रयाणां आसनानां नामानि लिखित्वा तेषां प्रयोजनं विशदयत ।

2. योगासनानि इति पाठात् यथेष्टम् आसनत्रयं व्याख्यात ।

x-------------------------x-------------------------x

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

आधुनिककाले योगासनानि बहुभिः जनैः आदृतानि भवन्ति । योगसूत्रणाम् कर्ता पतञ्जलिः महर्षिः । योगसनानि जन्मप्रभृति स्थितान् रोगान् निवर्तयन्ति इति योगाचार्याणां सिद्धान्तः । योगासनानि प्रतिदिनम् अभ्यासं कृतानि चेत् तदा मानसिक, कायिकरोगाणां निवृत्तिः भवति ।

योगः षड्दर्शनेषु एकः । चित्तवृत्तिनिरोधः योगः इति कथ्यते । यमनियमाऽऽसन - प्राणायामप्रत्याहारधारणाध्यानसमाधयः योगस्य अष्टौ अङ्गानि भवन्ति।

| | | |
|---|---|---|
| यमः | - | अहिंसा - सत्यम् - अस्तेय – ब्रह्मचर्य - अपरिग्रहाः यमाः (सू.30) |
| नियमाः | - | शौच - सन्तोष - तपः - स्वाध्याय - ईश्वरप्रणिधानाः नियमाः (सू.32) |
| आसन | - | स्थिरसुखमासनम् (सू.43) |
| प्राणायामः | - | श्वास - प्रश्वासयोः गतिविच्छेदः प्राणायामः (सू.49) |
| प्रत्याहारः | - | स्वविषयाऽसंप्रयोगे चित्तस्वरूपानुकार इव इन्द्रीयाणां प्रत्यहारः (सू.55) |

एते पञ्च योगस्य बहिर्साधनानि ।

| | | |
|---|---|---|
| धारणम् | - | देशबन्धश्चित्तस्य धारणः (3 विभूति 1 सूत्र) |
| ध्यानम् | - | तत्र प्रत्ययैकतानता ध्यानम् (3 विभूति 2 सूत्र) |
| समाधिः | - | अर्थमात्रं निर्भासं स्वरूपशून्यमिव समाधिः । |

धारण – ध्यान - समाधयः योगस्य अन्तरङ्गसाधनानि भवन्ति ।



Unit 8.indd 48 18-03-2019 13:39:29

## व्याकरण - अभ्यासः - 4

### धातुः – परस्मैपदी – लोट्  (Imperative)

### भू (भव्)  - to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवतु | भवताम् | भवन्तु |
| मध्यमपुरुषः | भव | भवतम् | भवत |
| उत्तमपुरुषः | भवानि | भवाव | भवाम |

### वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदतु | वदताम् | वदन्तु |
| मध्यमपुरुषः | वद | वदतम् | वदत |
| उत्तमपुरुषः | वदानि | वदाव | वदाम |

### पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठतु | पठताम् | पठन्तु |
| मध्यमपुरुषः | पठ | पठतम् | पठत |
| उत्तमपुरुषः | पठानि | पठाव | पठाम |



Unit 8.indd 49 18-03-2019 13:39:29

## घटनाक्रमः - 2

अधो लिखितानि वाक्यानि घटनाक्रमेण संयोजयत-

1. सस्यानाम् उपरि भागे धान्यगुच्छाः संभवन्ति ।
2. कृषीवलः हलेन भूमिं कृषति ।
3. क्रमशः सस्यानि वर्धन्ते ।
4. जलेन भूमिं सिञ्चति ।
5. ततः व्रीहीन् आवपति ।

## पत्रलेखनम् - 2

### ज्वरार्तस्य विरामपत्रम्

दिनाङ्कः _______

स्थानम् _______

प्रेषकः

xxxx (नाम)
दशमकक्ष्या
सरस्वती-पाठशाला
चेन्नै

प्रापकः
प्रधानाध्यापकः
सरस्वती-पाठशाला
चेन्नै

आर्य नमस्ते,

ह्यः प्रभृति अहं ज्वरवेगेन बाधितोऽस्मि । वैद्यः वदति - दिनत्रयं विश्रान्तिः आवश्यकी इति। अतः अद्य प्रभृति दिनत्रयपर्यन्तं कृपया विरामः देयः इति सविनयं प्रार्थये ।।

इत्थं
भवद्विनीतः
xxxxx



Unit 8.indd 50 18-03-2019 13:39:29

नवमः पाठः

Lesson – 9

# चन्द्रोदयवर्णनम्

# 9

एकश्चन्द्रः तमो हन्ति न च तारासहस्रकम् इति उक्तिः चन्द्रस्य महत्वं द्योतयति। कवयः स्वकाव्येषु प्रकृतिवर्णने चन्द्रस्य वर्णनम् अतीव उत्कृष्टतया वर्णयन्ति स्म। प्रायः अलङ्कारग्रन्थाः चन्द्रोदाहरणेनैव शोभन्ते। अतः अस्मिन् पाठ्यभागे रामायणे सुन्दरकाण्डे प्रकृतिवर्णनप्रसङ्गे चन्द्रोदयस्य वर्णनं कथं कृतमिति उपस्थाप्यते।



ततः स मध्यङ्गतमंशुमन्तं
ज्योत्स्नावितानं महदुद्वमन्तम्।
ददर्श धीमान् दिवि भानुमन्तं
गोष्ठे वृषं मत्तमिव भ्रमन्तम्॥ 1

लोकस्य पापानि विनाशयन्तं
महोदधिं चापि समेधयन्तम्।
भूतानि सर्वाणि विराजयन्तं
ददर्श शीतांशुमथाभियान्तम्॥ 2



Unit 9.indd 51 18-03-2019 13:43:48

या भाति लक्ष्मीर्भुवि मन्दरस्था
तथा प्रदोषेषु च सागरस्था ।
तथैव तोयेषु च पुष्करस्था
रराज सा चारुनिशाकरस्था ।। 3

हंसो यथा राजतपञ्जरस्थः
सिंहो यथा मन्दरकन्दरस्थः ।
वीरो यथा गर्वितगुञ्जरस्थः
चन्द्रो बभ्राज तथाम्बरस्थः ।। 4

स्थितः ककुद्मानिव तीक्ष्णशृङ्गः
महाचलः श्वेत इवोच्चशृङ्गः ।
हस्तीव जाम्बूनदबद्धशृङ्गः
रराज चन्द्रः परिपूर्णशृङ्गः ।। 5

विनष्टशीताम्बुतुषारपङ्को
महाग्रहग्राहविनष्टपङ्कः ।
प्रकाशलक्ष्म्याश्रयनिर्मलाङ्को
रराज चन्द्रो भगवान् शशाङ्कः ।। 6

शिलातलं प्राप्य यथा मृगेन्द्रो
महारणं प्राप्य यथा गजेन्द्रः ।
राज्यं समासाद्य यथा नरेन्द्रः
तथा प्रकाशो विरराज चन्द्रः ।। 7

प्रकाशचन्द्रोदयनष्टदोषः
प्रवृद्धरक्षः पिशिताशदोषः ।
रामाभिरामेरितचित्तदोषः
स्वर्गप्रकाशो भगवान् प्रदोषः ।। 8



Unit 9.indd 52 18-03-2019 13:43:48

इह सविपुले वाङ्मये महाकविः वाल्मिकिः वियतितरणिरिव विद्योतते। लौकिकभावमयं रस-भाव–भाषालङ्कारालङ्कृतं सर्वजनग्राह्यं महाकाव्यं रचयितत्वात् अयं कविः “आदिकविः” इति उपाधिना विभूष्यते। वाल्मीकेः कविता श्लेषसौन्दर्येण ध्वनिवैभवेन च समुल्लसिता अस्ति।

रामायणं न केवलं विदुषां भूषणम्, अपि तु सर्वेषां जनानां प्रियकरं भवति। भक्तानां भवनेषु च प्रतिदिनं पारायणं क्रियते। अत एवोक्तं वाल्मीकिना –

यावत् स्थास्यन्ति गिरयः सरितश्च महातले।
तावत् रामायणकथा, लोकेषु प्रचरिष्यति ॥ इति।

## अभ्यासः

**I. अधो दत्तानां शब्दानाम् अर्थं लिखत-**

| | | | |
|---|---|---|---|
| 1 | अंशुमान् | - | sun |
| 2. | ज्योत्स्ना | - | moon-light |
| 3. | धीमान् | - | wise men |
| 4. | महोदधिः | - | ocean |
| 5. | शीतांशुः | - | moon |
| 6. | वीरः | - | courageous |
| 7. | निशा | - | night |
| 8. | हंसः | - | swan |
| 9. | अम्बरः | - | sky |
| 10. | शृङ्गः | - | peak |

**II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-**

| | | | |
|---|---|---|---|
| 1. | वीरः | × | कातरः |
| 2. | उच्चः | × | नीचः |
| 3. | पूर्णम् | × | अपूर्णम् |
| 4. | दिवि | × | भुवि |
| 5. | प्रकाशः | × | अन्धकारः |



Unit 9.indd 53 18-03-2019 13:43:48

## III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत –

| | | | |
|---|---|---|---|
| 1. | मत्तमिव | - | मत्तम् + इव |
| 2. | शीतांशुः | - | शीत + अंशुः |
| 3. | महोदधिः | - | महा + उदधिः |
| 4. | चापि | - | च + अपि |
| 5. | मृगेन्द्रः | - | मृग + इन्द्रः |
| 6. | तथैव | - | तथा + एव |

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. दिवि भानुमान् कः ?
2. केन दृष्टः चन्द्रमाः ?
3. कस्मिन् स्थितः चन्द्रः बभ्राज ?
4. चन्द्रस्य अपरं नाम किम् ?
5. शिलातलं कः प्राप्नोति ?

x------------------------x------------------------x

## ? पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

रामायणम् आदिकाव्यम्, तत्कर्ता वाल्मीकिः आदिकविरिति च प्रसिद्धः । इतिहासमेनम् आश्रित्य प्रवृत्तानि कानिचित् काव्यानि नाटकानि च –

| | | |
|---|---|---|
| 1. भासकृतम् | - | प्रतिमानाटकम् |
| 2. कालिदासकृतम् | - | रघुवंशमहाकाव्यम् |
| 3. दिङ्नागकृता | - | कुन्दमाला |
| 4. भट्टिकृतम् | - | भट्टिकाव्यम् |
| 5. भवभूतिकृतम् | - | महावीरचरितम्, उत्तररामचरितं च |
| 6. मुरारिकृतः | - | अनर्घराघवः |
| 7. क्षेमेन्द्रकृता | - | रामायणमञ्जरी |
| 8. भोजराजकृतः | - | रामायणचम्पूः इत्यादयः |

किञ्च रामायणे आगमानाम्, उपनिषदाम्, स्मृतीनां, नीतिशास्त्रस्य, विज्ञानस्य, मनोविज्ञानस्य, आयुर्वेद – धनुर्वेद-ज्योतिष – तन्त्रादीनां साराः च समुस्थापिताः ।

रामायणस्य महत्वं स्कन्दपुराणे एवं उच्यते –

रामायणं नाम परं तु काव्यं, सुपुण्यप्रदं वै शृणुत द्विजेन्द्राः ।
यस्मिन् श्रुते जन्मजरादिनाशो, भवत्यदोषः स नरोऽच्युतः स्यात् ।। इति ।



Unit 9.indd 54 18-03-2019 13:43:48

# पाठ्यातिरिक्तः व्याकरणविषयः

## सन्धिपरिचयः

सन्धिः

- अच्सन्धिः (स्वरसन्धिः)
- हल्सन्धिः (व्यञ्जनसन्धिः)
- प्रकृतिभावसन्धिः
- विसर्गसन्धिः
- स्वादिसन्धिः

### 1. अच्सन्धिः (स्वरसन्धिः)

| | | | |
|---|---|---|---|
| 1. | सवर्णदीर्घसन्धिः | – | अकः सवर्णे अकि परे पूर्वपरयोः स्थाने दीर्घः एकादेशः स्यात् ।<br>यथा - राम + आलयः = रामालयः |
| 2. | गुणसन्धिः | – | अवर्णात् इकि परे पूर्वपरयोः स्थाने एको गुणः आदेशः स्यात् ।<br>यथा – वद + इति = वदेति |
| 3. | वृद्धिसन्धिः | – | अवर्णात् एचि परे पूर्वपरयोः स्थाने वृद्धिः एकादेशः स्यात् ।<br>यथा – रमा + एव = रमैव । |
| 4. | यणादेशसन्धिः | – | असवर्णे अचि परे इकः स्थाने यणः स्युः।<br>यथा – दधि + अत्र = दध्यत्र । |
| 5. | अयायादेशसन्धिः | – | एकारस्य ऐकारस्य च क्रमात् अय्, आय् आदेशौ स्यातां अचि परे ।<br>यथा – हरे + ए = हरये । |
| 6. | अवावादेशसन्धिः | – | ओकारस्य औकारस्य च स्थाने अव् आव् आदेशौ क्रमेण स्याताम् अचि परे ।<br>यथा – विष्णो + ए = विष्णवे । |
| 7. | पूर्वरूपसन्धिः | – | पदान्तात् एङः ह्रस्वाकारे परे पूर्वरूपम् एकादेशः स्यात् ।<br>यथा – हरे + अव = हरेऽव । |
| 8. | पररूपसन्धिः | – | अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पररूपं नित्यं स्यात् ।<br>यथा - प्र + एजते = प्रेजते । |
| 9. | अवङादेशसन्धिः | – | पदान्ते गोशब्दस्य अचि परे अवङादेशो वा भवति ।<br>यथा- गो + अग्रम् = गवाग्रम् / गोऽग्रम् । |



Unit 9.indd 55 18-03-2019 13:43:48

## 2. प्रकृतिभावसन्धिः

1. पदान्ताः इकः असवर्णे अचि परे प्रकृत्या स्युः ह्रस्वश्च वा भवति –

यथा – चक्री + अत्र = चक्री अत्र / चक्र्यत्र ।

## 3. हल्सन्धिः

| | | |
|---|---|---|
| 1. श्चुत्व सन्धिः | – | पूर्वत्र परत्र वा शवर्णः चवर्गान्यतरयोगे सति सकारस्य शवर्णः, तवर्गस्य चवर्गः च आदेशः भवेत् ।<br>यथा - हरिस् + शेते = हरिश्शेते । |
| 2. ष्टुत्वसन्धिः | – | षकारटवर्गयोर्योगे सति सकारस्य षकारः तवर्गस्य टवर्गः च आदेशः भवति ।<br>यथा – रामस् + षष्ठः = रामष्षष्ठः । |
| 3. जश्त्वन्धिः | – | पदान्ते वर्तमानानां झलां स्थाने सवर्णाः जशः स्युः ।<br>यथा - अच् + अन्तः = अजन्तः । |
| 4. अनुनासिकसन्धिः | – | पदान्तस्य यरः अनुनासिके परे सवर्णः अनुनासिकः वा स्यात् ।<br>यथा – तत् + मुरारिः = तन्मुरारिः । |
| 5. अनुस्वारसन्धिः | – | अपदान्तयोः मकारनकारयोः झलि परे, मकारान्तपदस्य हलि परे च अनुस्वारः स्यात् ।<br>यथा – हरिम् + वन्दे = हरिं वन्दे । |
| 6. परसवर्णसन्धिः | – | अपदान्तानुस्वारस्य ययि परे नित्यं परसवर्णः स्यात् ।<br>यथा – अं + कितः = अङ्कितः । |
| 7. पूर्वसवर्णसन्धिः | – | झयः परस्य हकारस्य पूर्वसवर्णो वा स्यात् ।<br>यथा – वाक् + हरिः = वाग्घरिः । |
| 8. छत्वसन्धिः | – | झयः परस्य शवर्णस्य छकारो वा स्यात् अमि परि ।<br>यथा– तत् + शिवः = तच्छिवः । |
| 9. चर्त्वसन्धिः | – | खरि परे झलां स्थाने चरः स्युः ।<br>यथा – षड् + शास्त्रम् = षट्शास्त्रम् । |
| 10. सत्वसन्धिः | – | अम्परक – छवि परतः नान्तस्य पदस्य, अम्यपरखयि परतः पुंशब्दस्य च सकारः आगमः स्यात् ।<br>यथा – चक्रिन् + त्रायस्व = चक्रिंस्त्रायस्व । |



Unit 9.indd 56 18-03-2019 13:43:48

11. तुगागमसन्धिः – अजन्तस्य छकारे परे तुगागमो नित्यं स्यात्।
यथा– राम + छत्रम् = रामच्छत्रम्।

12. धुडागमसन्धिः – डकारात्परस्य नकारत्परस्य च सस्य धुडागमो वा स्यात्।
यथा – षड् + सन्तः = षड् ध् सन्तः –
षड् त् सन्तः षट्त्सन्तः / षट्सन्तः।

13. ङमुडागमसन्धिः – ह्रस्वात्परो यो ङम्, तदन्तं यत्पदं, तस्मात्परस्य अचः नित्यं ङमुडागमः स्यात्।
यथा – प्रत्यङ् + आत्मा = प्रत्यङ्ङात्मा।

## 4. विसर्गसन्धिः

1. पदान्तसकारस्य रेफादेशः। तस्य खरि परे अवसाने च विसर्गः स्यात्।

   यथा – रामस् + खादति → रामर् खादति = रामः खादति।

2. विसर्गस्य खरि परे सकारादेशः।

   यथा - हरिः + तरति = हरिस्तरति।

3. खर्परकशरि परे वा विसर्गस्य लोपः स्यात्। रामः + स्ताता = रामस्ताता।

## 5. स्वादिसन्धिः

1. ह्रस्वाकारत्परस्य पदान्तसकारस्य उ इत्यादेशः स्यात् ह्रस्वाकारे, हशि च परे।

   यथा - रामस् + अर्च्यः → राम उ अर्च्यः = रामोऽर्च्यः।

2. अवर्णात् परस्य पदान्तसकारस्य अशि परे यादेशः।

   यथा – देवास् + इह = देवाय् + इह = देवायिह।

3. रेफढकारलोपनिमित्तभूतयोः रेफढकारयोः परतः पूर्वस्य अणः दीर्घः स्यात्।

   यथा - पुनर् + रमते = पुनारमते।

4. हलि परे एतत्तदोः सुप्रत्ययस्य नित्यं लोपः स्यात्।

   यथा - एषस् + रुद्रः = एष रुद्रः।



Unit 9.indd 57 18-03-2019 13:43:48

दशमः पाठः

Lesson – 10

# वैपरीत्यम्

10

अस्मिन् जगति सुखम् अवाप्तुं मानवः इच्छति। तदर्थं बुद्धिविकासः आवश्यकः। बुद्धिशक्तिं विना मानवः किमपि कार्यं साधयितुं न शक्नोति । बुद्धेः विकासस्तु विविधनीतिकथानाम् अध्ययनेन तेषां परिशीलनेन च अपि संभवति ।

संस्कृतसाहित्ये यद्यपि नीतिपराणि काव्यानि बहूनि सन्त्यपि विष्णुशर्मणा प्रणीतस्य पञ्चतन्त्रस्य स्थानं सर्वोत्कृष्टं भवति। पञ्चतन्त्रस्य कथा-माधुर्य-भावाभिव्यक्तिः सर्वैः ज्ञायते। अस्मात् एकां कथां ज्ञास्यामः।



अपि शास्त्रेषु कुशलाः लोकाचारविवर्जिताः ।
पुरुषा हास्यतां यान्ति यथा ते मूर्खपण्डिताः ।।

एकस्मिन् ग्रामे चत्वारो विद्यार्थिनः बालाः परस्परं मित्रभावम् आपन्नाः प्रतिवसन्ति स्म। तेषां देशान्तरं गत्वा विद्यायाः आर्जनं कर्तव्यमिति मतिरजायत । अथैकस्मिन् दिने ते प्रस्थाय



Unit 10.indd 58 18-03-2019 13:44:51

विद्योपार्जनार्थं कान्यकुब्जं गताः । तत्र शिवभट्टः नाम महापण्डितः एकः आचार्यः आसीत्। तम् उपगम्य ते सविनयमवदन् - “गुरुवर्य, विद्यार्थिनः वयं विद्याध्ययनाय भवत्सकाशमागताः । कृपया भवान् विद्याम् अध्यापयितुम् अर्हति ” इति । प्रसन्नः शिवभट्टः तान् छात्रान् अङ्गीचकार।

ततः द्वादशाब्दान् यावदेकचित्ततया पठन्तः सर्वे ते विद्याकुशलाः सञ्जाताः। अथाचार्यानुज्ञाम् अवाप्य स्वग्रामाय प्रस्थिताः । मध्येमार्गं द्वौ पन्थानौ मिलितौ। श्रान्तास्ते तत्रोपविष्टाः । मुहूर्तान्तरं तेष्वेकः पप्रच्छ, “केन मार्गेण गच्छामः” इति । तस्मिन्नेव समये तत्र प्रेतदहनार्थं श्मशानमुद्दिश्य ग्रामीणः महाजनो गतः । ततः चतुर्णामेकः स्वपुस्तकमुद्घाट्य एवम् अपठत् ।

“महाजनो येन गतः स पन्थाः” इति । अथ स महाजनमार्गेण गच्छामः इत्याह । बाढमित्युक्त्वा ते सर्वे श्मशानं प्राप्ताः । तत्र कञ्चन रासभं तिष्ठन्तं दृष्ट्वा, तेषु द्वितीयः पुस्तकम् अवलोक्य -

“उत्सवे व्यसने चैव दुर्भिक्षे शत्रुसङ्कटे ।

राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ।।”

इति पठित्वा च सोऽवदत् - “अहो अयं गर्दभः अस्मदीयो बान्धवः” इति ।

तेषु कश्चित् तस्य रासभस्य ग्रीवायां लगति । कोऽपि पादौ प्रक्षालयति, अन्यः अस्य मुखं चुम्बति, अपरस्तु कुशलप्रश्ने त्वरितो बभूव ।

अथ च यावत्ते दिशोऽवलोकयन्ति तावत् कश्चित् उष्ट्रः त्वरितगतिः समागतः । तं दृष्ट्वा तैश्चोक्तं एतत्किमिति । तावत् तृतीयेन पुस्तकमुद्घाट्य उक्तं - “धर्मस्य त्वरिता गतिः”। अतः अयं धर्मः। तावच्चतुर्थेनोक्तम् – “इष्टं धर्मेण योजयेत्” इति ।

अथ तैः सः रासभः उष्ट्रग्रीवायां निबद्धः । तदवलोक्य केनापि रजकस्याग्रे वृत्तान्तोऽयं कथितः। रजकोऽपि भीतः सत्वरं स्वजनैः समाजगाम । अपृच्छत् च तान् - किमेवं कृतमिति । ते प्रोचुः - “यथाशास्त्रमनुष्ठितमिति” । अत्रान्तरे प्रेतवाहकाः अपि तत्र समुदिताः । अथ सर्वे मिलित्वा किं तच्छास्त्रम्? इति पण्डितान् अपृच्छन् । ते पूर्वोक्तवचनानि पठित्वा तेषाम् अर्थं च उपन्यस्यन्ति स्म । तच्छ्रुत्वा ते सर्वे पण्डितानपि तान् मूर्खान् अलोकाचारज्ञान् मन्यमानाः परिजहसुः । ते च परिहसिता रासभोष्ट्रौ विहाय जग्मुः ।

अतः अलोकज्ञाः पुरुषाः पण्डित्यवन्तोऽपि हासपात्रं भवन्ति ।

नीतिशास्त्रपरकग्रन्थेषु पञ्चतन्त्रं विशिष्टं स्थानं भजते यस्य कर्ता विष्णुशर्मा। तेन पञ्चतन्त्रस्य कथामुखे आत्मानं सकलशास्त्रपारङ्गतं, छात्रवत्सलं अशीतिवर्षात्मकञ्चेति उद्घोषितावान् । कथासाहित्यस्य प्रयोजनविषये विष्णुशर्मणा एवम् उक्तम् -

अधीते य इदं नित्यं नीतिशास्त्रं श्रुणोति च ।

न पराभवमाप्नोति शक्रादपि कदाचन ।।



Unit 10.indd 59 18-03-2019 13:44:52

## अभ्यासः

### I. कठिनशब्दार्थः-

| | | | |
|---|---|---|---|
| 1. | कुशलाः | - | skilful |
| 2. | मूर्खः | - | fool |
| 3. | विद्यार्थिनः | - | students |
| 4. | आर्जनम् | - | gaining |
| 5. | पन्था | - | way |
| 6. | श्रान्ताः | - | tired |
| 7. | रासभः | - | donkey |
| 8. | उष्ट्रः | - | camel |
| 9. | बान्धवः | - | relation |
| 10. | ग्रीवा | - | neck |
| 11. | रजकः | - | washerman |
| 12. | वृत्तान्तः | - | story |
| 13. | प्रक्षालनम् | - | purifying |
| 14. | अत्रान्तरे | - | meanwhile |
| 15. | दुर्भिक्षम् | - | dearth |

### II. योजयत-

| | | | |
|---|---|---|---|
| 1. | विद्यार्थिनः | - | गुरुः |
| 2. | शिवभट्टः | - | रासभः |
| 3. | गर्दभः | - | छात्राः |
| 4. | कुशलाः | - | मार्गः |
| 5. | पन्थाः | - | समर्थाः |



Unit 10.indd 60 18-03-2019 13:44:52

## III. कोष्ठकात् उचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत -

1. बालाः परस्परं __________ प्रतिवसन्ति स्म । (शत्रुभावेन / मित्रभावेन)
2. बालाः विद्याम् अभ्यसितुं __________ गताः । (कान्यकुब्जम् / देहलीम् )
3. बालकाः __________ वर्षाणि विद्याभ्यासम् अकुर्वन् । (द्वादश / दश)
4. छात्राः श्मशाने __________ अपश्यन् । (रासभम् / अश्वम्)
5. उत्सवे व्यसने च __________ तिष्ठन्ति (शत्रवः / बान्धवाः)

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. वैपरीत्यं नाम कथा कस्मात् उद्धृता ?
2. लोकाचारविवर्जिताः कां यान्ति ?
3. बालाः अध्ययनाय कम् उपागच्छन् ?
4. धर्मस्य गतिः कीदृशी ?
5. शिवभट्टस्य समीपे कति विद्यार्थिनः अभ्यासम् अकुर्वन् ?

### पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

पञ्चतन्त्रे तन्त्रशब्दस्यार्थः मुख्यरूपेण विभागस्य खण्डस्य वा द्योतको भवति। समीचीनं शासनं कर्तुं पञ्चतन्त्रे पञ्चतन्त्राणि अर्थात् विधिरूपाणि निरूपितानि । तानि यथा -

1.मित्र भेदः 2.मित्रसम्प्रातिः 3.काकोलूकीयम्
4.लब्धप्रणाशः 5.अपरीक्षितकारञ्च

**मित्रभेदः -**

संसारे सर्वेषामपि मानवानां केचन शत्रवः सन्ति । अन्यानि कानिचन मित्राण्यपि वर्तन्ते । यदि येषां ज्ञानं भवति तदा सः शत्रुः भवति चेत् तस्मिन् काले तस्य शात्रवप्रतिकारोऽपि करणीयः । उक्तं हि पञ्चतन्त्रे –

जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत् ।
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते ।।

**मित्रसंप्राप्तिः -**

सर्वेषां मनुष्याणां उपरि यदा विपत्तिः आपतति तदा मित्रात् ऋते अन्यः कोऽपि वचनमात्रेणापि तस्य साहाय्यं कर्तुं न प्रभवति । उक्तं हि पञ्चतन्त्रे -



Unit 10.indd 61 18-03-2019 13:44:52

सर्वेषामेव मर्त्यानां व्यसनं समुपस्थिते ।

वाङ्मात्रेणापि साहाय्यं मित्रादन्यो न सन्दधे ।।

काकोलुकीयम् -

पूर्वं यो रिपुः भूत्वा पश्चात् मित्रभावेन स्निह्यति चेत् तेषाम् उपरि विश्वासः न करणीयः ।

न विश्वसेत् पूर्व-विरोधितस्य

शत्रोश्च मित्रत्वमुपागतस्य ।। इति ।

लब्धप्रणाशः -

यः विपद् समये धैर्यम् अवलम्ब्य कर्तव्यं जानाति सः दुर्गं तरति । तस्य कदापि विनिपातः न भवेत् । तथा चोक्तम् -

समुत्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते ।

स एव दुर्गं तरति जलस्थो वानरो यथा ।। इति ।

अपरीक्षितकारकम्

नरैः न केवलं दर्शनेन श्रवणेन, अविचारणेन च कार्यं न कर्तव्यम् । तदधिकृत्य संयक् विचार्य एव करणीयम् । विष्णुशर्मणा उक्तम् -

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।

तन्नरेण न कर्तव्यं नापितेनात्र यत् कृतम् ।। इति ।



Unit 10.indd 62 18-03-2019 13:44:52

# व्याकरण-अभ्यासः - 5

| तकारान्तः नपुंसकलिङ्गः“जगत्” शब्दः (wind) | | | |
|---|---|---|---|
| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | जगत् | जगती | जगन्ति |
| द्वितीया | जगत् | जगती | जगन्ति |
| तृतीया | जगता | जगद्भ्यां | जगद्भ्यः |
| चतुर्थी | जगते | जगद्भ्यां | जगद्भ्यः |
| पञ्चमी | जगतः | जगद्भ्यां | जगद्भ्यः |
| षष्ठी | जगतः | जगतोः | जगताम् |
| सप्तमी | जगति | जगतोः | जगत्सु |
| सं.प्र | हे जगत् ! | हे जगती ! | हे जगन्ति ! |

| त्रिशब्दः नित्यं बहुवचनान्तः (Three) | | | |
|---|---|---|---|
| विभक्तिः | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
| प्रथमा | त्रयः | तिस्रः | त्रीणि |
| द्वितीया | त्रीन् | तिस्रः | त्रीणि |
| तृतीया | त्रिभिः | तिसृभिः | त्रिभिः |
| चतुर्थी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| पञ्चमी | त्रिभ्यः | तिसृभ्यः | त्रिभ्यः |
| षष्ठी | त्रयाणाम् | तिसृणाम् | त्रयाणाम् |
| सप्तमी | त्रिषु | तिसृषु | त्रिषु |



Unit 10.indd 63 18-03-2019 13:44:52

## अनुच्छेदलेखनम् – 3

## (Comprehension – 3)

सूर्यः चन्द्रश्च ईश्वरस्य नेत्रे भवतः । पूर्णिमायाम् एव चन्द्रः पूर्णः भवति । पूर्णिमायां षोडशकलायुक्तः चन्द्रः दृश्यते । ततः एकैका कला क्षीणा भवति । सः कृष्णपक्षः । अमावास्यानन्तरं एकैका कला वर्धते । सः शुक्ल पक्षः । तस्य प्रकाशस्य नाम चन्द्रिका । सकलानि सस्यानि चन्द्रिकाद्वारैव रसं लभन्ते । अत एव अस्य सुधांशुः औषधीशः इति नामद्वयम् । ईदृशौ द्वौ प्रत्यक्षदेवौ (सूर्यचन्द्रमसौ) वयं प्रतिदिनं नमामः ।।

प्रश्नाः-



1. ईश्वरस्य नेत्रे के ?
2. चन्द्रस्य कति कलाः वर्तन्ते ?
3. चन्द्रः पूर्णिमायां कथं दृश्यते ?
4. कदा चन्द्रकला वर्धते ?
5. चन्द्रप्रकाशस्य नाम किम् ?

### अनुवादः – 3



एकदा चत्वारः कुमाराः आसन् । तेषु त्रयः शिक्षां प्राप्य विद्वांसः अभवन् । परम् एकः निरक्षरः एव आसीत्। त्रयः कुमाराः यत्किञ्चिदपि कर्म अविचार्य अकुर्वन् । निरक्षरः कुमारः सर्वदा विचारयित्वा कार्यं करोति स्म । एकदा वने सिंहस्य अस्थिपञ्जरम् अपश्यन् । ते तं सिंहम् उज्जीवयितुं प्रयत्नम् अकुर्वन् । निरक्षरः बालः ततः तान् निवारितान् । परं विद्यादर्पेण ते न अशृण्वन्। अन्ते जीवितः सिंहः तान् कुमारान् एव अखादयत्। । निरक्षरः कुमारः वृक्षमारुह्य स्वप्राणान् अरक्षत्।



Unit 10.indd 64 18-03-2019 13:44:53

एकादशः पाठः

Lesson – 11

# प्रहेलिकाः

11

व्यक्तिकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र बाह्य – आभ्यन्तरावर्थौ कथ्येते सा प्रहेलिका ॥

यत्र कस्यचित् पदस्य अर्थं स्पष्टीकृत्य, तस्यैव पदस्य निजस्वरूपार्थः गूढः भवति सा प्रहेलिका इति कथ्यते । प्रहेलिका षोडशविधाः भवन्ति । प्रहेलिकाः मनुष्याणां मनोरञ्जनाय, चिन्तनाशक्तिवर्धनाय च भवन्ति । अतः अत्र कतिपयाः प्रहेलिकाश्लोकाः प्रदीयन्ते ।

न तस्यादिः न तस्यान्तः
मध्ये यः तस्य तिष्ठति ।
तवाप्यस्ति ममाप्यस्ति
यदि जानासि तद्वद ॥ 1





मेघश्यामोऽस्मि न कृष्णः
महाकायः न पर्वतः ।
बलिष्ठोऽस्मि न भीमोऽस्मि
कोऽस्म्यहं नासिकाकरः ॥ 2

त्रिनेत्रोऽपि शिवो नास्ति
घटो नास्मि जलान्वितः ।
कूर्चश्मश्रुयुतो नित्यं
नरो नास्मि ब्रवीतु माम् ॥ 3





Unit 11.indd 65 18-03-2019 13:45:51



पादैः पिबामि यत् किञ्चित्
तिष्ठामि गगने सदा ।
दिनं करोमि रात्रिं च
शीतस्याहं निवारकः ।। 4

विना जलं न जीवामि
नाहं मत्स्यः न दर्दुरः ।
मयि वर्णाः त्रयः सन्ति
यः प्रथमः स अन्तिमः ।। 5





छात्राणां तु सखा अस्मि
वदामि च विना मुखम् ।
भूतं दूरं च यत्किञ्चित्
तत्सर्वं सूचयाम्यहम् ।। 6

## अभ्यासः

I. अधो दत्तानां शब्दानाम् अर्थं लिखत-

1. आदिः - beginning
2. अन्तः - ending
3. पर्वतः - mountain
4. कायः - body
5. घटः - pot
6. गगनं - sky
7. मत्स्यः - fish

8. सखा - friend

9. नयनम् - eye

10. नारिकेलः - coconut

## II. अधो लिखितानां पदानां विरुद्धार्थं लिखत-

1. आदिः × अन्तः
2. तव × मम
3. अस्ति × नास्ति
4. नित्यम् × अनित्यम्
5. दिनम् × रात्रिः
6. प्रथमः × अन्तिमः
7. दूरम् × अन्तिकम्

## III. यथोचितं सन्धिम् अथवा सन्धिविच्छेदं कुरुत –

1. तस्यादिः - तस्य + आदिः
2. बलिष्ठोऽस्मि - बलिष्ठः + अस्मि
3. त्रिनेत्रोऽपि - त्रिनेत्रः + अपि
4. शीतस्याहम् - शीतस्य + अहम्
5. सूचयाम्यहम् - सूचयामि + अहम्

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. मेघश्यामः कः ?
2. बलिष्ठः कः ?
3. शिवस्य कति नेत्राणि ?
4. गगने कः तिष्ठति ?
5. सूर्यः कस्य निवारकः ?

6. पुस्तकं केषां सखा ?

V. सविस्तरम् उत्तरं लिखत-

1. पञ्च प्रहेलिकानां श्लोकान् लिखित्वा विशदयत ।

2. यथेष्टं पञ्च प्रेहिलिकाः व्याख्यात ।

x------------------------x------------------------x

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

केचन चाटु (प्रहेलिका) श्लोकाः -

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदन्तं भक्तानां एकदन्तमुपास्महे ।। 1

आदिमध्यान्तरहितं दशाहीनं पुरातनम् ।
अद्वितीयमहं वन्दे मद्वस्त्रसदृशं हरिम् ।। 2

भोजनान्ते च किं पेयं जयन्तः कस्य वै सुतः ।
कथं विष्णु पदं प्रोक्तं तक्रं शक्रस्य दुर्लभम् ।। 3

सदा वक्रः सदा क्रूरः सदा मानधनापहः ।
कन्याराशिस्थितो नित्यं जामाता दशमो ग्रहः ।। 4

प्रातर्द्यूतप्रसंगेन मध्याह्ने स्त्रीप्रसंगतः ।
रात्रौ चौर्यप्रसंगेन कालो गच्छति धीमताम् ।। 5



Unit 11.indd 68 18-03-2019 13:45:51

## पाठ्यातिरिक्तः व्याकरणविषयः

### समासः

अनेकपदानां एकपदत्वव्यवहारः यत्र भवति, सः समासः । सः संक्षेपतः षोढा भवति ।

| समासः | तद्भेदाः |
|---|---|
| 1. तत्पुरुषसमासः | 8 |
| 2. कर्मधारयसमासः | 7 |
| 3. द्विगुसमासः | 2 |
| 4. बहुव्रीहिसमासः | 7 |
| 5. अव्ययीभावसमासः | 2 |
| 6. द्वन्द्वसमासः | 4 |

### तत्पुरुषसमासः (उत्तरपदार्थः मुख्यः)

1. प्रथमातत्पुरुषः - पूर्वः कायस्य = पूर्वकायः ।
2. द्वितीयातत्पुरुषः - कृष्णं श्रितः = कृष्णश्रितः ।
3. तृतीयातत्पुरुषः - मासेन पूर्वः = मासपूर्वः ।
4. चतुर्थीतत्पुरुषः - यूपाय दारु = यूपदारु ।
5. पञ्चमीतत्पुरुषः - चोरात् भयम् = चोरभयम् ।
6. षष्ठीतत्पुरुषः - राज्ञः पुरुषः = राजपुरुषः ।
7. नञ् तत्पुषः - न ज्ञानं = अज्ञानम् ।

### कर्मधारयसमासः (उत्तरपदार्थप्रधानः)

1. विशेषणपूर्वपदकर्मधारयः - नीलानि च तानि उत्पलानि = नीलोत्पलानि।
2. विशेष्यपूर्वपदकर्मधारयः - व्यंसकाश्च ते मयूराश्च = मयूरव्यंसकाः ।
3. विशेषणोभयपदकर्मधारयः - भोज्यं च तत् उष्णं च = भोज्योष्णम् ।
4. उपमानोत्तरपदकर्मधारयः - पुरुषो व्याघ्र इव = पुरुषव्याघ्रः ।
5. उपमानपूर्वपदकर्मधारयः - द्राक्षा इव मधुरा = द्राक्षामधुरा ।
6. सम्भावनापूर्वपदकर्मधारयः- तमाल इति वृक्षः = तमालवृक्षः ।
7. अवधारणापूर्वपदकर्मधारयः- कविः एव सागरः = कविसागरः ।

### 3. द्विगुसमासः (संख्यापूर्वः)

1. एकवद्भावी द्विगुः - पञ्चानां वटानां समाहारः – पञ्चवटी ।

2. अनेकवद्भावी द्विगुः - षण्णां मातृणां अपत्यं पुमान् – षाण्मातुरः ।

### 4. बहुव्रीहिसमासः (अन्यपदार्थप्रधानः)

1. द्विपदबहुव्रीहिः - प्राप्तः अग्निः यं सः – प्राप्ताग्निः ।
2. बहुपदबहुव्रीहिः - नीलं उज्जवलं च वपुः यस्य सः – नीलोज्ज्वलवपुः ।
3. संख्योभयपदबहुव्रीहिः - द्वौ वा त्रयो वा – द्वित्राः ।
4. संख्योत्तरपदबहुव्रीहिः - दशानां समीपे ये सन्ति ते – उपदशाः ।
5. सहपूर्वपदबहुव्रीहिः - कलाभिः सह वर्तन्ते इति – सकलाः ।
6. दिगन्तराललक्षणबहुव्रीहिः - उत्तरस्याश्च पूर्वस्याश्च दिशः यदन्तरालं – उत्तरपूर्वा।
7. व्यतिहारलक्षणबहुव्रीहिः - केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं – केशाकेशि ।

### 5. अव्ययीभावसमासः (पूर्वपदार्थप्रधानः)

1. अव्ययपूर्वपदाव्ययीभावः - अहनि अहनि – प्रत्यहम् ।

2. नामपूर्वपदाव्ययीभावः - सूपस्य लेशः – सूपप्रति ।

### 6. द्वन्द्वसमासः (उभयपदार्थप्रधानः)

1. द्विपदेतरेतरयोगद्वन्द्वः - कंसश्च रावणश्च – कंसरावणौ ।

2. बहुपदेतरेतरयोगद्वन्द्वः - वापी च कूपश्च तटाकश्च – वापीकूपतटाकाः ।

3. द्विपदसमाहारद्वन्दः - शीतं च उष्णं च तयोः समाहारः – शीतोष्णम् ।

4. बहुपदसमाहारद्वन्द्वः - पाणी च पादौ च ग्रीवा च तेषां समाहारः - पाणिपादग्रीवम् ।



Unit 11.indd 70 18-03-2019 13:45:51

द्वादशः पाठः

Lesson – 12

# ध्रुवचरितम् 12

ध्रुवचरितं नाम कथांशः महर्षि-वेदव्यास-विरचिते भागवतपुराणे चतुर्थस्कन्धे अष्टमे अध्याये भवति । युक्तियुक्तं वचो ग्राह्यं बालादपि शुकादपि इत्युक्तिः । अस्माकं भारते बालकाः अपि वैराग्यशीलाः सन्तः वचनानि अब्रुवन् । प्रायः इतिहास – पुराणादीनामवलोकनेन बालाकाः अपि सवैराग्यं सधैर्थं कार्यम् अकुर्वन् इति ज्ञायते । अतः अस्मिन् पाठ्यभागे भागवतात् बालकस्य ध्रुवस्य चरितं कथारूपेण प्रदत्तं विद्यते ।

पुरा उत्तानपादो नाम नृपः आसीत् । तस्य द्वे भार्ये आस्ताम् । सुनीतिः, सुरुचिः च । तयोः सुरुचिः नृपस्य प्रियतरा । सुनीतेः पुत्रः ध्रुवः। सुरुचेः पुत्रः उत्तमः । एकदा उत्तानपादः स्वाङ्के उत्तमं निधाय लालयन् आसीत् । तदा तत्र ध्रुवः आगतः ।



ध्रुवः - तात ! अहं तव अङ्कम् आरोढुम् इच्छामि ।

सुरुचिः - कुमार ! त्वं मम पुत्रः नासि । मम पुत्रः एव नृपतेः अङ्के आरोढुम् अर्हति ।

(तदाकर्ण्य ध्रुवः नितरां दुःखितः भूत्वा मातुः समीपं गत्वा सर्वं वृत्तान्तम् अकथयत् )

सुनीतिः - कुमार ! "मा विषादं कुरु"। भगवन्तं सेवस्व । ततः त्वम् अभीष्टं लप्स्यसे।

ध्रुवः - आम् अहं वनं गत्वा भगवन्तं उद्दिश्य तपः करोमि । (इत्युक्त्वा वनम् अगच्छत्)

(वने तपः कर्तुं गच्छन्तं तं दृष्ट्वा नारदः अपृच्छत् )



Unit 12.indd 71 18-03-2019 14:25:36

नारदः - "वत्स ! कठिनं तपः कर्तुं नायं कालः । त्वं गृहं गच्छ"

ध्रुवः - अहं विमातुः वचनेन दुःखितः भवामि । अतः मम व्रतानुष्ठानं निश्चयमेव ।

नारदः - तर्हि मधुवनं गत्वा तत्र भगवन्तं हरिम् आराधय। अचिरादेव सः ते अभीष्टं प्रदास्यति ।

(ध्रुवस्य कठिनं तपः दृष्ट्वा भीताः देवाः हरिम् उपगम्य तं तपसः निर्वतयितुम् अप्रार्थयन्। ततः ध्रुवस्य पुरतः विष्णुः आविरभूत् ।)



विष्णुः - वत्स ! मां पश्य ।

ध्रुवः - अनुगृहीतोऽस्मि । मम शतकोटिप्रणामाः ।

विष्णुः - अलं तव तपसा । अहम् अतीव संतुष्टोऽस्मि । सूर्येव, चन्द्रेव नक्षत्राणीव त्वम् आकाशे स्थिरं स्थानं अवाप्स्यसि इति वरं दत्वा अन्तर्दधे ।

एवं भगवतः वरं लब्ध्वा नगरं प्रतिनिवृत्तं ध्रुवं दृष्ट्वा पिता उत्तानपादः नितरां मोदते स्म।।

अस्य पुराणस्य रचयिता महर्षिः वेदव्यासः । ब्रह्मनिष्ठाः यतयः अध्यात्मज्ञानप्रदातारं भगवन्तं वेदव्यासमहर्षिं सादरं सश्रद्धं च प्रीणयन्ति । अस्य बादरायणः इति नामान्तरम् । आचार्यस्य पारंपर्यमपि अनेन श्लोकेन ज्ञायते ।

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ।।



Unit 12.indd 72 18-03-2019 14:25:36

**ग्रन्थपरिचयः**

भगवतः इदं भागवतम्। अस्मिन् पुराणे श्रीकृष्णस्य लीलावर्णनं कृतं भवति। अत्र बहूनां भागवतोत्तमानां चरितम् उल्लिखितं भवति । अस्य पुराणस्य "निगम कल्पतरोः गलितं फलम्" इत्यपि प्रशस्तिः अस्ति ।

## अभ्यासः

### I. कठिनशब्दार्थः-

| | | | |
|---|---|---|---|
| 1. | नृपः | - | king |
| 2. | भार्या | - | wife |
| 3. | अङ्कम् | - | lap |
| 4. | पुत्रः | - | son |
| 5. | वृत्तान्तम् | - | story |
| 6. | विषादम् | - | grief |
| 7. | अभीष्टम् | - | desire |
| 8. | तपः | - | penance |
| 9. | कठिनम् | - | hard |
| 10. | अचिरात् | - | shortly |
| 11. | प्रणामाः | - | salutation |
| 12. | अन्तर्दधे | - | disapeared |
| 13. | नितराम् | - | very much |
| 14. | नक्षत्राणि | - | stars |
| 15. | आविरभूत् | - | appeared |

## II. योजयत-

1. उत्तानपादः - आकाशे स्थिरं स्थानम्
2. सुनीतिः - सुरुचिः
3. तपः स्थानम् - नृपः
4. विमाता - ध्रुवस्य माता
5. वरम् - मधुवनम्

## III. कोष्ठकात् उचितं पदं स्वीकृत्य रिक्तस्थानानि पूरयत-

1. ध्रुवः __________ तपः अकरोत् । (शिवं प्रति / विष्णुं प्रति)
2. उत्तमस्य माता __________ । (सुरुचिः / सुनीतिः )
3. मार्गमध्ये ध्रुवः __________ ददर्श । (नारदमुनिम् / अगत्स्यमुनिम्)
4. ध्रुवः भगवतः __________ अभवत् । (अप्रीतिपात्रम् / प्रीतिपात्रम्)
5. __________ इव स्थिरं स्थानम् अवाप्स्यसि (नक्षत्राणि / गृहाणि)

## IV. अधः प्रदत्तानां प्रश्नानाम् उत्तरं लिखत-

1. ध्रुवस्य पिता कः ?
2. उत्तमः कुत्र उपाविशत् ?
3. विमातुः वचनं श्रुत्वा ध्रुवः कथम् अभूत् ?
4. ध्रुवः किमर्थं वनं जगाम ?
5. ध्रुवः कुत्र तपः अकरोत् ?
6. ध्रुवस्य पुरतः कः आविरभूत् ?
7. ध्रुवः कस्य प्रीतिपात्रम् अभवत् ?

x-------------------------x-------------------------x



Unit 12.indd 74 18-03-2019 14:25:36

## पाठ्यप्रश्नातिरिक्ताः ज्ञातव्यविषयाः

भागवतपुराणे द्वादशस्कन्धाः सन्ति । प्रत्येकस्मिन् स्कन्धे अध्यायाः एवं भवन्ति ।

| स्कन्धाः | अध्यायाः |
|---|---|
| 1. प्रथमस्कन्धः | 19 |
| 2. द्वितीयस्कन्धः | 10 |
| 3. तृतीयस्कन्धः | 33 |
| 4. चतुर्थस्कन्धः | 31 |
| 5. पञ्चमस्कन्धः | 26 |
| 6. षष्ठस्कन्धः | 19 |
| 7. सप्तमस्कन्धः | 15 |
| 8. अष्ठमस्कन्धः | 24 |
| 9. नवमस्कन्धः | 24 |
| 10. दशमस्कन्धः (पूर्वार्धे) | 49 |
| दशमस्कन्धः (उत्तरार्धे) | 41 |
| 11. एकादशस्कन्धः | 31 |
| 12. द्वादशस्कन्धः | 13 |

सर्वेषां अध्यायानाहत्य 18,000 अष्टादशसहस्रश्लोकाः सन्ति । अयं ग्रन्थः विश्वभाषासु अनुवादं कृतो भवति ।

भारते ध्रुवेव भगवतः अनुग्रहं प्राप्तवन्तः भागवतोत्तमाः अनेकाः सन्ति । तेषु प्रह्लादः एकः बालकः भागवतोत्तमः । तस्य चरितम् अत्र दीयते -

पुरा हिरण्यकशिपुः नाम राक्षसः बभूव । तस्य पत्नी कयादु । तयोः प्रह्लादो नाम सर्वोत्तमपुत्रः अजायत ।



Unit 12.indd 75 18-03-2019 14:25:36

मातुः गर्भावस्थायामेव प्रह्लादः नारदमुखेन विष्णोः प्रभावं शृणोति स्म। तत्प्रभावेन प्रह्लादः जननादारभ्य विष्णोः भक्तः अभवत् ।

सः राक्षसकुले जातोऽपि राक्षसस्वभावः तस्य न विद्यते स्म ।

एकदा हिरण्यकशिपुः स्वपुत्रम्, अभ्यसितुं गुरुगुलं प्रेषयामास । गुरुकुले आचार्यः हिरण्यकशिपोः प्रभावं बोधयामास ।

तन्निराकृत्य प्रह्लादः भगवन्तं विष्णुमेव अस्तौषीत् । तत् ज्ञात्वा विष्णोः शत्रुः हिरण्यकशिपुः स्वपुत्रं बहुधा (बहुप्रकारेण) अपीडयत् ।

प्रह्लादः तान् सर्वानपि पीडान् विष्णोः अनुग्रहेण पारंगतवान् । अन्ते हिरण्यकशिपुः "तव विष्णुः कुत्र अस्ति " तं मे प्रदर्शयतु, नो चेत् मारयामि इति घोषयामास ।

पितुः वचनं श्रुत्वा प्रह्लादः किञ्चिदपि अनालोच्य "भगवान् विष्णुः सर्वत्रापि वर्तते" इत्यवदत् ।

तदा हिरण्यकशिपुः कोपेन सह समीपस्थं स्तम्भं दर्शयित्वा एतस्मिन् स्तम्भे तव विष्णुः आविर्भविष्यति किम् इति अपृच्छत् ।

प्रह्लादः दृढनिश्चयेन अवश्यम् आविर्भविष्यति इति अकथयत्। उक्तमात्रेण तद् स्तम्भात् नृसिंहः आविर्बभूव ।

भक्तः प्रह्लादवचनैः बद्धः नृसिंहः तम् अनुगृह्य तस्य पितुः राक्षसस्य हिरण्यकशिपोः वधं कृतवान् ।

इत्थं ध्रुव इव प्रह्लादोऽपि भगवतः नामोच्चारणेन मोक्षं कीर्तिं च लब्धवान्।



Unit 12.indd 76 18-03-2019 14:25:36

## व्याकरण-अभ्यासः - 6

## धातुः – परस्मैपदी - लृङ्

### भू (भव्) - to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभविष्यत् | अभविष्यताम् | अभविष्यन् |
| मध्यमपुरुषः | अभविष्यः | अभविष्यतम् | अभविष्यत |
| उत्तमपुरुषः | अभविष्यम् | अभविष्याव | अभविष्याम |

### वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवदिष्यत् | अवदिष्यताम् | अवदिष्यन् |
| मध्यमपुरुषः | अवदिष्यः | अवदिष्यतम् | अवदिष्यत |
| उत्तमपुरुषः | अवदिष्यम् | अवदिष्याव | अवदिष्याम |

### पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठिष्यत् | अपठिष्यताम् | अपठिष्यन् |
| मध्यमपुरुषः | अपठिष्यः | अपठिष्यतम् | अपठिष्यत |
| उत्तमपुरुषः | अपठिष्यम् | अपठिष्याव | अपठिष्याम |



Unit 12.indd 77 18-03-2019 14:25:37

## घटनाक्रमः - 3

### अधो लिखितानि वाक्यानि घटनाक्रमेण संयोजयत -

1. नालिकेरवृक्षः शाखारहितः सप्रयोजनं च दृश्यते ।
2. तानि पत्राणि गृहनिर्माणाय उपयुज्यन्ते ।
3. अस्मिन् दीर्घाः नालिकेरकाण्डाः सन्ति ।
4. केरपत्रैः गृहपटलादिकं निर्मीयन्ते ।
5. काण्डस्य शिरसि अनेकानि पत्राणि दृश्यन्ते।

## पत्रलेखनम् - 3

### विहारयात्रागमनार्थम् अनुमतिपत्रम्

दिनाङ्कः_____

स्थानं _______

प्रियपितः

शतकोटिप्रणामाः सन्तु ।

अहं कुशलः भवामि। भवानपि तत्र कुशलम् इति मन्ये। मम विद्यालये विहारयात्रायाः आयोजनं कृतम् । यात्रास्थलं तु "ऊट्टि" इति मन्ये । अहमपि मित्रैः सह गन्तुम् इच्छामि । तदर्थं सहस्ररूप्याकाणि प्रेषयतु इति प्रार्थये ।

इत्थं

भवत्प्रियपुत्रः

XXXXX

विलासः

XXXXX



Unit 12.indd 78 18-03-2019 14:25:37

# वर्णावृत्तिः

## अक्षरपरिचयः

वर्णाः (Letters)
எழுத்துக்கள்

स्वराः (अचः)
Vowels
உயிரெழுத்துக்கள்

व्यञ्जनानि (हलः)
Consonants
மெய்யெழுத்துக்கள்

## (i) स्वराः (Vowels)

स्वराः - यस्य वर्णस्य उच्चारणे अपरस्य वर्णस्य सहायता नापेक्षिता, तस्य स्वरः इति नाम। यथा -

अ आ इ ई उ ऊ ऋ ॠ

ऌ ए ऐ ओ औ अं अः

स्वराः

ह्रस्वः (Short)
குறில்

दीर्घः (Long)
நெடில்

### ह्रस्वस्वराः (Short Vowels)

अ इ उ ऋ ऌ

### दीर्घस्वराः (Long Vowels)

आ ई ऊ ॠ ए ऐ ओ औ

## (ii) हलः (व्यञ्जनानि) Consonants

व्यञ्जनानि – यस्य वर्णस्य उच्चारणे स्वरवर्णस्य सहायता अपेक्षिता तस्य हलः इति नाम।

कवर्गः - क ख ग घ ङ

चवर्गः - च छ ज झ ञ



Unit 12.indd 79 18-03-2019 14:25:37

| | | | | | |
|---|---|---|---|---|---|
| टवर्गः | - | ट | ठ | ड | ढ | ण |
| तवर्गः | - | त | थ | द | ध | न |
| पवर्गः | - | प | फ | ब | भ | म |
| अन्तस्थाः | - | य | र | ल | व | |
| ऊष्माणः | - | श | ष | स | ह | |

## (iii) स्वरयुक्तव्यञ्जनाक्षराणि (Compound letters)

| | | |
|---|---|---|
| क् + अ = क | क् + आ = का | क् + इ = कि |
| क् + ई = की | क् + उ = कु | क् + ऊ = कू |
| क् + ऋ = कृ | क् + ॠ = कॄ | क् + ऌ = कॢ |
| क् + ए = के | क् + ऐ = कै | क् + ओ = को |
| क् + औ = कौ | क् + अं = कं | क् + अः = कः |

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| क | का | कि | की | कु | कू | कृ | कॄ | कॢ | के | कै | को | कौ | कं | कः |
| ख | खा | खि | खी | खु | कू | कृ | खॄ | खॢ | खे | खै | खो | खौ | खं | खः |
| ग | गा | गि | गी | गु | गू | गृ | गॄ | गॢ | गे | गै | गो | गौ | गं | गः |
| घ | घा | घि | घी | घु | घू | घृ | घॄ | घॢ | घे | घै | घो | घौ | घं | घः |
| ङ | ङा | ङि | ङी | ङु | ङू | ङृ | ङॄ | ङॢ | ङे | ङै | ङो | ङौ | ङं | ङः |
| च | चा | चि | ची | चु | चू | चृ | चॄ | चॢ | चे | चै | चो | चौ | चं | चः |
| छ | छा | छि | छी | छु | छू | छृ | छॄ | छॢ | छे | छै | छो | छौ | छं | छः |
| ज | जा | जि | जी | जु | जू | जृ | जॄ | जॢ | जे | जै | जो | जौ | जं | जः |
| झ | झा | झि | झी | झु | झू | झृ | झॄ | झॢ | झे | झै | झो | झौ | झं | झः |
| ञ | ञा | ञि | ञी | ञु | ञू | ञृ | ञॄ | ञॢ | ञे | ञै | ञो | ञौ | ञं | ञः |
| ट | टा | टि | टी | टु | टू | टृ | टॄ | टॢ | टे | टै | टो | टौ | टं | टः |



Unit 12.indd 80 18-03-2019 14:25:37

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ठ | ठा | ठि | ठी | ठु | ठू | ठृ | ठॄ | ठॢ | ठे | ठै | ठो | ठौ | ठं | ठः |
| ड | डा | डि | डी | डु | डे | डृ | डॄ | डॢ | डे | डै | डो | डौ | डं | डः |
| ढ | ढा | ढि | ढी | ढु | ढे | ढृ | ढॄ | ढॢ | ढे | ढै | ढो | ढौ | ढं | ढः |
| ण | णा | णि | णी | णु | णू | णृ | णॄ | णॢ | णे | णै | णो | णौ | णं | णः |
| त | ता | ति | ती | तु | तू | तृ | तॄ | तॢ | ते | तै | तो | तौ | तं | तः |
| थ | था | थि | थी | थु | थु | थृ | थॄ | थॢ | थे | थै | थो | थौ | थं | थः |
| द | दा | दि | दी | दु | दू | दृ | दॄ | दॢ | दे | दै | दो | दौ | दं | दः |
| ध | धा | धि | धी | धु | धू | धृ | धॄ | धॢ | धे | धै | धो | धौ | धं | धः |
| न | ना | नि | नी | नु | नू | नृ | नॄ | नॢ | ने | नै | नो | नौ | नं | नः |
| प | पा | पि | पी | पु | पू | पृ | पॄ | पॢ | पे | पै | पो | पौ | पं | पः |
| फ | फा | फि | फी | फु | फू | फृ | फॄ | फॢ | फे | फै | फो | फौ | फं | फः |
| ब | बा | बि | बी | बु | बू | बृ | बॄ | बॢ | बे | बै | बो | बो | बं | बः |
| भ | भा | भि | भी | भु | भू | भृ | भॄ | भॢ | भे | भै | भो | भौ | भं | भः |
| म | मा | मि | मी | मु | मू | मृ | मॄ | मॢ | मे | मै | मो | मौ | मं | मः |
| य | या | यि | यी | यु | यू | यृ | - | - | ये | यै | यो | यौ | यं | यः |
| र | रा | रि | री | रु | रू | - | - | - | रे | रै | रो | रौ | रं | रः |
| ल | ला | लि | ली | लु | लू | लृ | - | - | ले | लै | लो | लौ | लं | लः |
| व | वा | वि | वी | वु | वू | वृ | वॄ | वॢ | वे | वै | वो | वौ | वं | वः |
| श | शा | शि | शी | शु | शू | शृ | शॄ | शॢ | शे | शै | शो | शौ | शं | शः |
| ष | षा | षि | षी | षु | षू | षृ | षॄ | षॢ | षे | षै | षो | षौ | षं | षः |
| स | सा | सि | सी | सु | सू | सृ | सॄ | सॢ | से | सै | सो | सौ | सं | सः |
| ह | हा | हि | ही | हु | हू | हृ | हॄ | हॢ | हे | है | हो | हौ | हं | हः |



Unit 12.indd 81 18-03-2019 14:25:37

## (iv) संयुक्ताक्षराणि
## Conjunct Consonants

**क्**

क् + क= क्क

क् + त= क्त

क् + य= क्य

क् + र= क्र

क् + ष= क्ष

क् + व= क्व

**ख्**

ख्+ य= ख्य

**ग्**

ग्+ म= ग्म

ग्+ न= ग्न

ग्+ र = ग्र

**घ्**

घ्+ म= घ्म

घ्+ न= घ्न

घ् + य= घ्य

घ् + र= घ्र

**च्**

च्+ च= च्च

च्+ छ= च्छ

च्+ न= च्न

च्+ म= च्म

च्+ र= च्र

**ज्**

ज्+ ज= ज्ज

ज्+ न= ज्न

ज्+ म= ज्म

ज्+ य = ज्य

ज्+ र = ज्र

ज् + ञ= ज्ञ

**ट्**

ट्+ ट= ट्ट

ट्+ य = ट्य

ट्+ र= ट्र

**ठ्**

ठ्+ य = ठ्य

**ड्**

ड्+ ड= ड्ड

ड्+ य = ड्य

ड्+ र= ड्र

**ण्**

ण्+ क= ण्क

ण्+ ड= ण्ड

ण्+ ण= ण्ण

**त्**

त्+ क= त्क

त्+ त= त्त

त्+ म= त्म

त्+ न= त्न

त्+ र= त्र

त्+ य = त्य

त्+ व= त्व

**थ्**

थ्+ य = थ्य

थ्+ व= थ्व

थ्+ र= थ्र

**द्**

द्+ ग= द्ग

द्+ द= द्द

द्+ व= द्व

द् + ध= द्ध

द्+ र= द्र

द् + म= द्म

द्+ य= द्य

**ध्**

ध्+ न= ध्न

ध्+ म= ध्म

ध्+ य= ध्य

ध्+ र= ध्र

ध्+ व= ध्व

**न्**

न्+ क= न्क

न्+ त= न्त

न्+ द= न्द

न्+ न= न्न

न्+ म= न्म

न्+ व= न्व

**प्**

प्+ त= प्त

प्+ न= प्न

प्+ म= प्म

प्+ य= प्य

प्+ र= प्र

फ्

फ् + ल= फ्ल

ब्

ब्+ ज= ब्ज

ब्+ द= ब्द

ब्+ ध= ब्ध

ब्+ व= ब्व

ब्+ र= ब्र

भ्

भ्+ न= भ्न

भ्+ य= भ्य

भ्+ व= भ्व

भ्+ र= भ्र

म्

म्+ न= म्न

म्+ म= म्म

म्+ य= म्य

म्+ ल= म्ल

म्+ र= म्र

य्

य्+ य= य्य

य्+ व= य्व

र्

र्+ क= र्क

र्+ त= र्त

र्+ न= र्न

र्+ म= र्म

र्+ य= र्य

ल्

ल्+ क= ल्क

ल्+ त= ल्त

ल्+ न= ल्न

ल्+ प= ल्प

ल्+ ल= ल्ल

व्

व्+ न= व्न

व्+ य= व्य

व्+ र= व्र

श्

श्+ च= श्च

श्+ छ= श्छ

श्+ न= श्न

श्+ व= श्व

श्+ र= श्र

ष्

ष्+ क= ष्क

ष्+ ट= ष्ट

ष्+ ण= ष्ण

ष्+ म= ष्म

ष्+ र= ष्र

स्

स्+ क= स्क

स् + त= स्त

स्+ थ = स्थ

स् + म= स्म

स्+ र= स्र

ह्

ह्+ व= ह्व

ह् + ण= ह्ण

ह्+ न = ह्न

ह् + म= ह्म

ह् + य = ह्य

ह् + र= ह्र

# लिङ्गज्ञानम्

## (i) पुल्लिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. बालकः | 2. अजः | 3. गजः | 4. अश्वः | 5. रथः |
| 6. हस्तः | 7. नरः | 8. वानरः | 9. छात्रः | 10. अध्यापकः |
| 11.वृक्षः | 12. बकः | 13. कन्दुकः | 14. सूर्यः | 15. मकरः |
| 16. शशकः | 17. हंसः | 18. काकः | 19. मेघः | 20.मीनः |
| 21. मयूरः | 22. मृगः | 23. सिंहः | 24.पर्वतः | 25. चन्द्रः |
| 26. कृषकः | 27. पिकः | 28. सर्पः | 29. शुकः | 30. गर्दभः |

## (ii) स्त्रीलिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. बालिका | 2. लता | 3. पेटिका | 4. शिबिका | 5. माला |
| 6. छात्रा | 7. अध्यापिका | 8. सेविका | 9. महिला | 10. मक्षिका |
| 11. कलिका | 12. वाटिका | 13. शाखा | 14. घटिका | 15. नौका |
| 16. वर्तिका | 17. पताका | 18. चटका | 19. शाटिका | 20. सरिता |
| 21. पाठशाला | 22. पत्रिका | 23. वेला | 24. वेदिका | 25. कन्या |
| 26. प्रतिमा | 27. कुल्या | 28. मासिका | 29. जिह्वा | 30. पादुका |

## (iii) नपुंसकलिङ्गपदानि

| | | | | |
|---|---|---|---|---|
| 1. फलम् | 2. पत्रम् | 3. गृहम् | 4. पुष्पम् | 5. कमलम् |
| 6. शाकम् | 7. नेत्रम् | 8. मुखम् | 9. धनम् | 10. जलम् |
| 11. चित्रम् | 12. वनम् | 13. विमानम् | 14. दुग्धम् | 15. भवनम् |
| 16. उद्यानम् | 17. नक्षत्रम् | 18. नगरम् | 19. पुस्तकम् | 20. छत्रम् |
| 21. बीजम् | 22. यन्त्रम् | 23. ओदनम् | 24. वस्त्रम् | 25. मोदकम् |
| 26. सोपानम् | 27. पात्रम् | 28. ज्ञानम् | 29. शरीरम् | 30. उपनेत्रम् |



Unit 12.indd 84 18-03-2019 14:25:37

## वचनविभागः

### (i) पुल्लिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | बालकः | बालकौ | बालकाः |
| 2. | अजः | अजौ | अजाः |
| 3. | गजः | गजौ | गजाः |
| 4. | रथः | रथौ | रथाः |
| 5. | वृक्षः | वृक्षौ | वृक्षाः |
| 6. | वानरः | वानरौ | वानराः |
| 7. | अश्वः | अश्वौ | अश्वाः |
| 8. | मयूरः | मयूरौ | मयूराः |
| 9. | शुकः | शुकौ | शुकाः |
| 10. | सिंहः | सिंहौ | सिंहाः |

### (ii) स्त्रीलिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | बालिका | बालिके | बालिकाः |
| 2. | लता | लते | लताः |
| 3. | माला | माले | मालाः |
| 4. | पेटिका | पेटिके | पेटिकाः |
| 5. | महिला | महिले | महिलाः |
| 6. | पताका | पताके | पताकाः |
| 7. | शाखा | शाखे | शाखाः |
| 8. | पाठशाला | पाठशाले | पाठशालाः |
| 9. | नौका | नौके | नौकाः |
| 10. | मक्षिका | मक्षिके | मक्षिकाः |



Unit 12.indd 85 18-03-2019 14:25:37

## (iii) नपुंसकलिङ्गवचनानि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. | फलम् | फले | फलानि |
| 2. | पत्रम् | पत्रे | पत्राणि |
| 3. | कमलम् | कमले | कमलानि |
| 4. | नेत्रम् | नेत्रे | नेत्राणि |
| 5. | धनम् | धने | धनानि |
| 6. | वनम् | वने | वनानि |
| 7. | विमानम् | विमाने | विमानानि |
| 8. | गृहम् | गृहे | गृहाणि |
| 9. | मोदकम् | मोदके | मोदकानि |
| 10. | पुस्तकम् | पुस्तके | पुस्तकानि |

## अजन्तपुल्लिङ्गशब्दाः

### 1. अकारान्तः पुल्लिङ्गः राम शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः |
| द्वितीया | रामम् | रामौ | रामान् |
| तृतीया | रामेण | रामाभ्याम् | रामैः |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः |
| षष्ठी | रामस्य | रामयोः | रामाणाम् |
| सप्तमी | रामे | रामयोः | रामेषु |
| सम्बोधन-प्रथमा | हे राम ! | हे रामौ ! | हे रामाः ! |



Unit 12.indd 86 18-03-2019 14:25:37

## 2. इकारान्तः पुल्लिङ्गः हरि शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | हरिः | हरी | हरयः |
| द्वितीया | हरिम् | हरी | हरीन् |
| तृतीया | हरिणा | हरिभ्याम् | हरिभिः |
| चतुर्थी | हरये | हरिभ्याम् | हरिभ्यः |
| पञ्चमी | हरेः | हरिभ्याम् | हरिभ्यः |
| षष्ठी | हरेः | हर्योः | हरीणाम् |
| सप्तमी | हरौ | हर्योः | हरिषु |
| सम्बोधन-प्रथमा | हे हरे ! | हे हरी ! | हे हरयः ! |

## 3. उकारन्तः पुल्लिङ्गः गुरु शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधन-प्रथमा | हे गुरो ! | हे गुरू ! | हे गुरवः ! |

## 4. ऋकारान्तः पुल्लिङ्गः पितृ शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पिता | पितरौ | पितरः |
| द्वितीया | पितरम् | पितरौ | पितॄन् |
| तृतीया | पित्रा | पितृभ्याम् | पितृभिः |
| चतुर्थी | पित्रे | पितृभ्याम् | पितृभ्यः |
| पञ्चमी | पितुः | पितृभ्याम् | पितृभ्यः |
| षष्ठी | पितुः | पित्रोः | पितॄणाम् |
| सप्तमी | पितरि | पित्रोः | पितृषु |
| सम्बोधन-प्रथमा | हे पितः ! | हे पितरौ ! | हे पितरः ! |



Unit 12.indd 87 18-03-2019 14:25:37

## 5. ओकारान्तः पुल्लिङ्गः गो शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गौः | गावौ | गावः |
| द्वितीया | गां | गावौ | गाः |
| तृतीया | गवा | गोभ्यां | गोभिः |
| चतुर्थी | गवे | गोभ्यां | गोभ्यः |
| पञ्चमी | गोः | गोभ्यां | गोभ्यः |
| षष्ठी | गोः | गवोः | गवाम् |
| सप्तमी | गवि | गवोः | गोषु |
| सम्बोधन-प्रथमा | हे गौः ! | हे गावौ ! | हे गावः ! |

## अजन्तस्त्रीलिङ्गशब्दाः

## 1. आकारान्तः स्त्रीलिङ्गः रमा शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | रमा | रमे | रमाः |
| द्वितीया | रमाम् | रमे | रमाः |
| तृतीया | रमया | रमाभ्यां | रमाभिः |
| चतुर्थी | रमायै | रमाभ्यां | रमाभ्यः |
| पञ्चमी | रमायाः | रमाभ्यां | रमाभ्यः |
| षष्ठी | रमायाः | रमयोः | रमाणाम् |
| सप्तमी | रमायाम् | रमयोः | रमासु |
| संबोधन-प्रथमा | हे रमे ! | हे रमे ! | हे रमाः ! |



Unit 12.indd 88 18-03-2019 14:25:37

## 2. इकारान्तः स्त्रीलिङ्गः मति शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्यां | मतिभिः |
| चतुर्थी | मत्यै-मतये | मतिभ्यां | मतिभ्यः |
| पञ्चमी | मत्याः-मतेः | मतिभ्यां | मतिभ्यः |
| षष्ठी | मत्याः-मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्-मतौ | मत्योः | मतिषु |
| संबोधन-प्रथमा | हे मते ! | हे मती ! | हे मतयः ! |

## 3. ईकारान्तः स्त्रीलिङ्गः नदी शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | नदी | नद्यौ | नद्यः |
| द्वितीया | नदीम् | नद्यौ | नदीः |
| तृतीया | नद्या | नदीभ्यां | नदीभिः |
| चतुर्थी | नद्यै | नदीभ्यां | नदीभ्यः |
| पञ्चमी | नद्याः | नदीभ्यां | नदीभ्यः |
| षष्ठी | नद्याः | नद्योः | नदीनाम् |
| सप्तमी | नद्याम् | नद्योः | नदीषु |
| संबोधन-प्रथमा | हे नदि ! | हे नद्यौ ! | हे नद्यः ! |



Unit 12.indd 89 18-03-2019 14:25:37

## 4. उकारान्तः स्त्रीलिङ्गः धेनु शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | धेनुः | धेनू | धेनवः |
| द्वितीया | धेनुम् | धेनू | धेनूः |
| तृतीया | धेन्वा | धेनुभ्यां | धेनुभिः |
| चतुर्थी | धेन्वै-धेनवे | धेनुभ्यां | धेनुभ्यः |
| पञ्चमी | धेन्वाः-धेनोः | धेनुभ्यां | धेनुभ्यः |
| षष्ठी | धेन्वाः-धेनोः | धेन्वोः | धेनूनाम् |
| सप्तमी | धेन्वाम्-धेनौ | धेन्वोः | धेनुषु |
| संबोधन-प्रथमा | हे धेनो ! | हे धेनू ! | हे धेनवः ! |

## 5. ऋकारान्तः स्त्रीलिङ्गः मातृ शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | माता | मातरौ | मातरः |
| द्वितीया | मातरम् | मातरौ | मातॄः |
| तृतीया | मात्रा | मातृभ्यां | मातृभिः |
| चतुर्थी | मात्रे | मातृभ्यां | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्यां | मातृभ्यः |
| षष्ठी | मातुः | मात्रोः | मातॄणाम् |
| सप्तमी | मातरि | मात्रोः | मातृषु |
| संबोधन-प्रथमा | हे मातः ! | हे मातरौ ! | हे मातरः ! |



Unit 12.indd 90 18-03-2019 14:25:37

# अजन्तनपुंसकलिङ्गशब्दाः

## 1. अकारान्तः नपुंसकलिङ्गः ज्ञान शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ज्ञानम् | ज्ञाने | ज्ञानानि |
| द्वितीया | ज्ञानम् | ज्ञाने | ज्ञानानि |
| तृतीया | ज्ञानेन | ज्ञानाभ्यां | ज्ञानैः |
| चतुर्थी | ज्ञानाय | ज्ञानाभ्यां | ज्ञानेभ्यः |
| पञ्चमी | ज्ञानात् | ज्ञानाभ्यां | ज्ञानेभ्यः |
| षष्ठी | ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |
| सप्तमी | ज्ञाने | ज्ञानयोः | ज्ञानेषु |
| संबोधन-प्रथमा | हे ज्ञान ! | हे ज्ञाने ! | हे ज्ञानानि ! |

## 2. अकारान्तः नपुंसकलिङ्गः फल शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | फलम् | फले | फलानि |
| द्वितीया | फलम् | फले | फलानि |
| तृतीया | फलेन | फलाभ्यां | फलैः |
| चतुर्थी | फलाय | फलाभ्यां | फलेभ्यः |
| पञ्चमी | फलात् | फलाभ्यां | फलेभ्यः |
| षष्ठी | फलस्य | फलयोः | फलानाम् |
| सप्तमी | फले | फलयोः | फलेषु |
| संबोधन-प्रथमा | हे फल ! | हे फले ! | हे फलानि ! |



Unit 12.indd 91 18-03-2019 14:25:38

## 3. इकारान्तः नपुंसकलिङ्गः वारि शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्यां | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्यां | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्यां | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| संबोधन-प्रथमा | हे वारे !, हे वारि ! | हे वारिणी ! | हे वारीणि ! |

## 4. उकारान्तः नपुंसकलिङ्गः मधु शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मधु | मधुनी | मधूनि |
| द्वितीया | मधु | मधुनी | मधूनि |
| तृतीया | मधुना | मधुभ्यां | मधुभिः |
| चतुर्थी | मधुने | मधुभ्यां | मधुभ्यः |
| पञ्चमी | मधुनः | मधुभ्यां | मधुभ्यः |
| षष्ठी | मधुनः | मधुनोः | मधूनाम् |
| सप्तमी | मधुनि | मधुनोः | मधुषु |
| संबोधन-प्रथमा | हे मधो !, हे मधु ! | हे मधुनी ! | हे मधूनि ! |

### 5. ऋकारान्तः नपुंसकलिङ्गः कर्तृ शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | कर्तृ | कर्तृणी | कर्तॄणि |
| द्वितीया | कर्तृ | कर्तृणी | कर्तॄणि |
| तृतीया | कर्तृणा | कर्तृभ्यां | कर्तृभिः |
| चतुर्थी | कर्तृणे-कत्रे | कर्तृभ्यां | कर्तृभ्यः |
| पञ्चमी | कर्तृणः-कर्तुः | कर्तृभ्यां | कर्तृभ्यः |
| षष्ठी | कर्तृणः-कर्तुः | कर्तृणोः-कर्त्रोः | कर्तॄणाम् |
| सप्तमी | कर्तृणि-कर्तरि | कर्तृणोः-कर्त्रोः | कर्तृषु |
| संबोधन-प्रथमा | हे कर्तृ ! | हे कर्तृणी ! | हे कर्तॄणि ! |

### (ii) धातुः – परस्मैपदी - लट् (Present Tense)

### वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदति | वदतः | वदन्ति |
| मध्यमपुरुषः | वदसि | वदथः | वदथ |
| उत्तमपुरुषः | वदामि | वदावः | वदामः |

### भव् – to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भवति | भवतः | भवन्ति |
| मध्यमपुरुषः | भवसि | भवथः | भवथ |
| उत्तमपुरुषः | भवामि | भवावः | भवामः |



Unit 12.indd 93 18-03-2019 14:25:38

पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठमि | पठावः | पठामः |

(ii) धातुः – परस्मैपदी - लङ् (Past Tense)

वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अवदत् | अवदताम् | अवदन् |
| मध्यमपुरुषः | अवदः | अवदतम् | अवदत |
| उत्तमपुरुषः | अवदम् | अवदाव | अवदाम |

भव् – to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अभवत् | अभवताम् | अभवन् |
| मध्यमपुरुषः | अभवः | अभवतम् | अभवत |
| उत्तमपुरुषः | अभवम् | अभवाव | अभवाम |

पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | अपठत् | अपठताम् | अपठन् |
| मध्यमपुरुषः | अपठः | अपठतम् | अपठत |
| उत्तमपुरुषः | अपठम् | अपठाव | अपठाम |



Unit 12.indd 94 18-03-2019 14:25:38

## धातुः - परस्मैपदी - लृट् – (Future Tense)

### वद् – to speak

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | वदिष्यति | वदिष्यतः | वदिष्यन्ति |
| मध्यमपुरुषः | वदिष्यसि | वदिष्यथः | वदिष्यथ |
| उत्तमपुरुषः | वदिष्यामि | वदिष्यावः | वदिष्यामः |

### भव् – to be

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

### पठ् – to read

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठिष्यति | पठिष्यतः | पठिष्यन्ति |
| मध्यमपुरुषः | पठिष्यसि | पठिष्यथः | पठिष्यथ |
| उत्तमपुरुषः | पठिष्यामि | पठिष्यावः | पठिष्यामः |



Unit 12.indd 95 18-03-2019 14:25:38

# संस्कृतरञ्जनी - Class X
# List of Authors and Reviewers


**Chair Person**

**Dr. R. Thiagarajan,** M.A, Ph.D.,
Former Prof. of P.G & Research,
Department of Sanskrit,
Presidency College, Chennai.

**Reviewer**

**Dr. V. Mohan,** M.A, Ph.D.,
Asst. Director,
CPR Institute of Indological Research Centre,
Alwarpet, Chennai.

**Authors**

**K. Maheswari,** Siromani, Sikshasastri,
PG Asst. in Sanskrit,
Sri Ahobila Math OHSS, Chennai.

**Dr. V.V. Rajeswari**, M.A., M.Ed., Ph.D.,
PG Asst., in Sanskrit, Sri Ahobila Math OHSS,
Chennai.

**S. Muthukumaraswamy,** Siromani, M.A., M.Phil., B.Ed.
Sanskrit Pandit, Sri Ahobila Math OHSS,
Chennai.

**V. Sriram,** Siromani, M.A., M.Phil., B.Ed.,
Sanskrit Pandit, Sri Ahobila Math OHSS,
Chennai.

**Text Book Writing**

**Indological Research Institute**,
CPR Foundation,
Alwarpet, Chennai.

**Co-ordinator**

**K.Chandrasekaran**
Lecturer,
DIET, Chennai.


## Art and Design Team


Layout
**Thy designer**

Cover Design
**Kathir Arumugam**

In-House
**Manohar Rathakrishnan**
**Jerald Wilson**

Co-ordination
**Ramesh Munisamy**

Typist
**Shanthi**



This book has been printed on 80 G.S.M.
Elegant Maplitho paper.

Printed by offset at: